व्यापारविशेषः क्रमेः वलातग्रहणपूर्वकं देशांतरप्रापणं हरतेः एव कर्तुरिति कर्मत्वं गोर्ध्वंशः एवं च भाष्यात् ज्ञानार्थस्य ग्रहणं
प्राचामनुरोधेनेतितत्वं भाष्योक्तात् दुहियाचिरुधिप्रच्छि भिक्षि चिञ् ब्रुवि शासयः अर्थनिबंधनेयमितिदमपि केयटा
नुरोधेन वस्तुतस्तु येषामेतदर्थानां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थत्वेन कर्तुरीप्सितत्वसिद्धमन्यथा अव्याख्यातोपयोगे
इतिसूत्रभाष्योक्तपरिगणनत्वभंगापत्तिः किंच भाष्ये भिक्षिग्रहणं वैयर्थ्यापत्ति उभयार्थकयाचिग्रहणेनैव सिद्धेरि
त्यन्ये अकर्मकधातुभिरिति तेषां स्वकरणकव्यापने वृत्त्याव्याप्तिरूपफलाश्रयत्वेन कर्तुरितिकर्मत्वं मासमास्ते इत्यादेर्मा
समासनेन व्याप्नोतीत्यादिक्रमेणार्थ इतिभावः यत्विदमेवकर्मसंज्ञाविधायकमितितन्न भाष्यताहशवचनानुप
लंभात् अकथितं चेतिसूत्रे ऽकर्मकप्रकृतिकण्यंतानां कथं द्विकर्मकत्वमितिशंकायां कालभावाध्वगंतव्याः कर्म
संज्ञाकर्मणां देशश्चेतिभाष्ये उक्तं तच्च न विधायकं हि शब्दघटितत्वात् किंच कालाध्वनोरितिसूत्रे कालाध्वनो
कर्मवदितिवक्तव्यमितिवार्तिकप्रत्याख्याने प्राकृतमेवेतत् कर्मयथा कटं करोतीत्युक्तं अस्यवचनत्वे उक्तं वाप्राकृतत्वे
निवदेत् तस्मात्उक्तरीत्याकालादीनां तद्योगे कर्मत्वं तथा द्विकर्मकत्वमित्येव न तात्पर्यं अत एव समांसमां विजाय
त इतिसूत्रे समांसमां विजायत इतिविग्रहकथनपरं भाष्यं संगच्छते अन्यथा ऽनेन द्वितीयाया एव साधुत्वेन तत्संगतिः

स्पष्टैव अत्रतावोक्तं भाष्यार्थो नवादिकाहरेः कारिकाकालभावाध्वदेशानामंतर्भूतक्रियांतरैः सर्वैरकर्मकैर्योगेकर्मत्वमुपजा
यत इति सकर्मकविषयेप्यनेन प्रकारेण कालादिकर्मणां सकर्मकत्वं तुल्यन्यायात् तेन मासमोदनं पचतीति भवतित
त्र कालादिकर्म प्रधानं द्रव्यकर्म तु प्रधानं कालस्याधारत्वेन द्रव्यद्वारेव क्रियासंबंधात् किं च कुठि नपाकस्य महाप्र
तिभाणस्य बहुसंख्यस्य च चिरेणपाको ऽन्यथान्यस्याचिरेणेति द्रव्यधर्मपर्यालोचक्रियासु कालयोग इति सबहिरं
गः अपि च साधनसंबंधे जाते क्रियायाः परिच्छेदकत्वात्सकालादीनां तेन सबहिरंगः अकर्मकव्यवहारस्तु धात्व
र्थाद्व्यकर्म भावनिमित्तक एव अत्र बीजं वक्ष्यते तदुक्तं अत्र तस्तैः कर्मनिर्युक्तो धातुर्द्विधैरकर्मकः तस्य कर्मणो भा
वे च निमित्तत्वायकल्पते इति गतिबुद्धिः शब्दः कर्मकारकं येषामित्यर्थः व्याख्यानात् तेन हापयति कं दपत्यो
र्नं अणाविति णौ चानुत्पन्ने इत्यर्थः अत्र णीन्नहेतुमणिजेव सणावित्यत्रापि सएव व्याख्यानात् अत्र न तएव भर्तृर्नि
बेधस्त्वरिनार्थः सहिनित्य एषं तद्भुरादिरितिवाच्यं अत्र मानधीन लक्षणार्थप्राधान्यशाब्दप्राधान्ययोः प्रयोजक
व्यापारे सत्त्वेन तदनुरोधिकर्मत्वस्यांतरंगादपि कर्तृत्वाद्बलवत्त्वेन कर्तरि स्मेव सिद्धेणिजर्थे नाप्यमानस्य चे
ऽन्मादीनामेवेति नियमार्थमिदं तेन पाचयत्यादियोगे नेति हेतुमानिचेतिसूत्रे भाष्यकृतः प्रधानकार्यस्व

त्तो वलवदिति आकडारसूत्रे कैयटे स्पष्टं । तेन गत्यादियोगे प्रयोज्यस्य कर्मत्वशक्तिमत्तायां च यत्यादियोगे कर्तृत्वशक्तिमत्त्वमेवेति
बोध्यं गमयति देवदत्तेनेति यत्तद्दत्तकर्मकगमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बो
धः अत्र देवदत्तस्य न कर्मत्वं तिर्यंत्रिति ति यंतकर्तृकण्यंतप्रकृतिभूतस्येत्यर्थः प्रापणार्थवहेर्गत्यर्थत्वाभावेपि ग्रामं प्राप्तइत्या
दौ तत्प्राप्तेर्गतिं विना संभवाद्धिंसगत्यापि गत्यर्थत्वमित्यभिमानेन वार्तिकारंभः सुखं प्रापयत्यादौ न तत्र दोषः तत्र कर्तुरिति आ
दिकर्मणि बोध्यः अत एव ग्रामं प्रापयति देवदत्तेनेत्येवेति ध्वनितं गतिसूत्रे नयतेरिति सूत्रे च भाष्ये नयते सुखप्रापणाद्यर्थादिरिव
गमुपसर्जनं प्रापणं वा अभिमतितस्य गत्यर्थत्वमेवेति बोध्यं आदिखाद्योरिति प्रत्यवसानार्थत्वात्प्राप्तिः प्रत्यवसाने भक्षणेव
लीवर्दानिति हिंसायां भक्षणे भक्षेर्वृत्तिः परकीयसस्यभक्षणे परो हिंसितो भवतीति तत्स्वामिनोऽत्र हि सादृश्यव्याजस्य
नी । ति पुत्रो धर्मं जल्पति तद्बोधकवासानिः कथयति देवदत्तो जल्पयति धर्मं पुत्रमित्यर्थः शब्दापयतीति शब्दं करोतीत्यर्थे
शब्दवैरकलहादिक्यङ् तातूणि च परेतु शब्दक्रियाणामित्यर्थे शब्दापयति शब्दापयतिकं दयतीनां प्रतिषेधः उक्तो भाष्ये न तु
शब्दकर्मकाणामिति पक्षे एवं च तत्र पक्षे भाष्ये शब्दापयते प्रतिषेधानुत्साकर्मकशब्दायतिसत्त्वेन मानं शब्दस्य धात्व
र्थसंग्रहीतत्वेपि वहिर्भूतपुत्रादिकर्मणो भावे मानाभावात्तशब्दापनाविवेति चिंत्योयं निषेध इत्याहुः । येषामिति अपं भा

वः गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णाविति सूत्रे नियमस्य सजातीयापेक्षत्वात्सकर्मकाणां चेदेषामेवे
ति नियमपरं एवं सिद्धेऽकर्मकग्रहणं सामर्थ्याद्देशकालादिभिन्नकर्माभाववतोऽकर्मकग्रहणेनग्रहणार्थं तच्च सामान्यापे
क्षेऽज्ञापकं शास्त्रेऽकर्मकपदेनेदृशानामेव ग्रहणमिति तत्र समासमासस्य नञ् इत्यादौ भावे ल भवति न त्विति तन्न विवक्षाहि द्विधा
तदन्वययोग्यधात्वर्थत्यागात् सत्येव तस्मिन्नर्थे तत्र संबंधित्वेनान्वयविवक्षणाद्वेति भावः इदं कैयटानुरोधेन परेष्ठ
त्यविवक्षितकर्मकाणामप्यकर्मकपदेन ग्रहणं क्रादीनामविवक्षितकर्मकेभ्यः क्तान्तपूर्वीकृष्टमित्यादौ भाष्यकृता कैय
टेन चांगीकारात् लुनाति निवृत्तप्रेषणात् णौ चिलावयति केदारं देवदत्त इत्यादौ केदारस्य कर्मत्वस्थितौ यां तस्यैरणा
वित्यत्र कैयटे नप्रयोगाच्च न चात्रार्थान्तरवृत्त्याऽकर्मकत्वं न तत्त्वविवक्षयेति वाच्यं तत्त्वप्रत्यभिज्ञायाः अर्थान्तरत्वाभावात्
तदुदाहरणं तु स्पंदत इत्यादावर्थे न दीव्यतीत्याकरे स्पष्टं न्यधीगर्थेति सूत्रे कर्मणः शेषत्वविवक्षयाऽकर्मकत्वे मातुः
स्मर्यतइत्यत्र भावे लस्य भाष्योदाहृतत्वाच्च पञ्चप्रकृतसूत्रे भाष्ये कालकर्मकर्मणामुपसंख्यानं कर्तव्यं नक
र्मत्वं न च केचित् कालभावाध्वभिरकर्मकाः स्युरेवंविज्ञास्यामः कश्चिच्चेदकर्मका इतीत्युक्तं क्वचिदित्यस्य कालादेः
कर्मसंज्ञाप्रयोजकव्याप्त्यादिरहिते र्थे इत्यर्थः तस्यायं भावः उक्तरीत्याकर्मकपदसामर्थ्यादत्र शास्त्रेऽकर्मक

पदस्यादस्यांतरेकर्मरहितेत्यर्थः इति तादृशत्वं च सर्वथा दृश्यकर्माभावात् तदविवक्षणाद्वा उभयविधमपि कृत्नपूर्वीत्यादिभा
ष्याद्युक्तं विनिगमनाविरहाच्च अत एवाकर्मकाधिकारेषु हृत्पादिष्व आत्मनेपदविधानं संगच्छते अकर्मकशब्दे च धातु
रेवान्यपदार्थः अर्थभेदेन च एवं भेदः कर्मत्वेनकालाद्यतिरिक्तकर्मानन्वय्यर्थकत्वं च तत्त्वमिति बोध्यं न च केचिदिति भाष्याण
धातुमात्रस्य कालकर्मकार्थवृत्तित्वमिति दर्शितं यद्वा यत्कर्म भवति न च भवति ते नाकर्मणां न चैतत्कर्म कश्चिदपि न भवती
ति भाष्योक्तपक्षांतरेण तत्सामर्थ्यात्त व्यभिचारिद्रव्यकर्मरहिते त्यर्थो बोधितः एवं च मासादि प्रयोगोपि तदवस्थाव्याप्त्यैवाकर्म
कत्वं बोध्यं एतेनात्र सूत्रे न च केचिदिति प्रतीकमुपादाय कालादेर विवक्षणात्तेरकर्मकत्वसंभवोस्यैवेत्याशंक्यालंतातिघमा
न कर्मकाणामेवात्र शास्त्रेऽकर्मकपदेन ग्रहणमन्यथा पचादीनामविवक्षितकर्मत्वेलादयः स्युरितिप्रत्युक्तं यदेनोक्तं तत
परास्तं अतिप्रसंगस्त्वनभिधानाद्वारणीय इति वदंति हृक्रोः तत्राप्यवपूर्वस्य हरतेर्भक्षणार्थत्वाद्विकारार्थकरोतेश्चा
कर्मकत्वात् प्राप्तेऽर्थान्तरे चाप्राप्ते उभयत्र विभाषेयं अभिवादिदृहेतुमण्यंन स्याभिवादर्दर्शिग्रहणातिकण्यंतस्य चेत्य
र्थः अविचिशी आधारत्वमनुवर्त्तते तस्यैव कर्मत्वशक्तिमतानेनबोध्यते अभिनि आख्यानादभिनीति द्वंद्वे तत्पूर्वीवि
शीति समासे अभिनिवेश आग्रहः सन्मार्गविषयकाग्रहवान् इत्यर्थः व्यवस्थितेति परिक्रयणे इत्यतोऽन्यतरस्यां

ग्रहणानुवृत्तेरस्यैव कालिकत्वं अतिप्रसंगस्त्वनभिधानान्नादरणीयः एतच्च षष्ठ्यर्थे ष्ठाभितिविख्यानामितिप्रतीके समर्थसूत्रे कैयट ८
दे परे त्वेतद्भाष्यप्रयोगादभितिविशिष्यानुपूर्व्यादिप्रविक्रूनायायत्र श्रवणं तत्रैवेन तस्तत्र प्रवृत्तिरन्यतरस्यां ग्रहणानुवृत्तेोध्य
वास्थितविभाषाश्रयणे च न मानामित्याहुः उपानु अलक्षिकरणत्वाद्भादेरेव ग्रहणमित्याह वसतेरिति भाष्ये ऽशयर्थस्य
नेत्युक्तं महाकार्षी धूमश्रति वदशिनिवृत्त्यर्थस्येति तदर्थस्तत्फलितमाह अभुक्तर्थस्यनेति उपोष्य रजनीमेकामित्यादौ का
लाध्वनो रिति द्वितीया ग्रामे उपवसतीत्यत्र ग्रामे वसन् त्रिरात्रमुपवसतीत्यर्थ इदं न कार्यमिति भाष्ये स्पष्टं उपपदवि
भक्तिमाह उभेति उपपदविभक्तीनां संबंधोऽर्थः विशिष्यार्थानुक्तेः षष्ठ्यपवादत्वाच्च उभसर्वयोस्तसाविति विग्रहः
उभाशे उभयशब्दनिष्ठं प्रकृतित्वमुभशब्दे आरोप्य तत्प्रकृतिकत्वं षष्ठ्यर्थः उभयशब्द सर्वशब्दप्रकृतिकतसंतयोगे
ऽत्यर्थः आम्रेडितांतेष्विति कृतद्विर्वचनेष्वित्यर्थः धिक्कृष्णेति धिगर्थाः निंदाकृष्णाभक्तसंबंधिनिंदेत्यर्थः उपर्यादि
नां समीपोर्ध्वदेशादिवृत्तित्वमर्थः अभितः परित इत्यत्र पर्यभिभ्यां चेति तसिल् तत्राद्यस्योभयत इत्यर्थे त्यस्यास
र्वत इत्यर्थः इति पर्यभिभ्यां चेत्यत्र भाष्ये अंतरांतरेण अंतरेणेत्यटावंत साहचर्यादंतरेत्यस्याव्ययं अंतरेत्यत्र तृतीयांतसा
हचर्यादंतरेणेत्यत्र तृतीयांतं साहचर्यसाहचर्यं तद्घ्राग्ग्यस्य गोर्दिनीये नार्थ इति गोरेवानीयते नाश्वो नगरं भइति दृष्टां

तपर भाष्येण सदृशानामेव प्रयोगे सहायतेत्यर्थस्य प्रतिपादनान् तेन किमनयोरंतरेण ज्ञातेनेति सिद्धमंतरेण विशेषेरोतस्य
र्थः एवं चेत्तयोरमयपोरेवग्रहणं यद्यंतराराद्वस्य प्रत्ययैभेकवचनांतस्यानभिधानादंतरा इस्या दुवीकमव्ययमेव प्रयोगे
बृहस्पते इतित्साहचर्यादंतरेणेत्यव्ययमेवतदुक्तं भाष्ये तराशब्दाप मद व्यापचारो निपात एवेतीति । बोध्यं त्पूर्वधित्व
रूपः संबंधोमध्यत्वान्वयीमध्यपंतिनराशब्दयोगे द्वितीयार्थः तस्यैव संबंधत्वेनबोधषष्ठी हर्यादिपदानु न द्वितीया उपप
दविभक्तेरिति न्यायेनतत्र प्रथमा याराव प्राप्तेः युक्तग्रहणं तु स्पष्टार्थं अधिकृत्येति विभाषाकृञीत्यंतमितिबोध्यं महासंज्ञा
करणं तत्त्वधीय कर्मक्रियां प्रोक्तवतः कर्मप्रवचनीयाः बाहुलकात्कर्तरि भूते नीयः तेन संप्रतिक्रियानघोतयंति किंतु क्रि
यानिरूपितं संबंधविशेषं घोतयंति क्वचित्संबंधविशेषा घोतकेपि वचनसामर्थ्यात्संज्ञा यथाधिपरीक्ष्य नर्थकोसुः पूजा
यामितिच निपातसंज्ञासमावेशास्त्वस्या अप्युक्तं लक्षणइति तत्संबंधेलक्ष्यलक्षणभावरूपेणनाघोत्येइत्यर्थः अस्यवा
दर्शनघोत्यसंबंधस्य क्रियाजनितोप्राप्तिः तेनप्रकृते नोर्गीतिगतावितिनिघातोन द्वितीयार्था लक्ष्यलक्षणभावः संबंधा
हेतुश्चेत्यत्र नाघोत्यते लक्षणत्वं ज्ञानजनकज्ञानविषयत्वं जपज्ञाने नहिकालविशेषविशिष्टाह्यादि ज्ञीप्यतेजपाभि
न्नहेतुज्ञानजन्यज्ञानविषयो वर्षणमितिबोध्य इत्याहु हेतुभूतेति परापीतिकर्मप्रवचनीयसंज्ञावकाशो हेतुत्वा

ते

विवक्षायां हेतुत्तृतीयावकाशो ऽनेन कृतमिति प्रकृते च हेतुत्वविवक्षायां परत्वात्तृतीयाप्राप्तिरिति भावः पुनः संज्ञेति लक्षणेत्थंभूतेत्ये
व सिद्धे पुनः संज्ञाकरणबोधितपुनर्द्वितीयाविधानसामर्थ्यादित्यर्थः एतेन संज्ञाया विजातीयत्वाद्विभक्तिबाधः ईकर्तुं न शक्य
इति सूरास्तस्य चेदं भाष्ये तृतीयार्थे तृतीयाशब्देन तन्निमित्तशब्दसहयुक्ते इत्यत्रोपात्तोऽनंतरत्वात्सहशब्दो लक्ष्यते
तदर्थसाहित्ये द्योत्ये इत्यर्थः साहित्यरूपः संबंधोनुद्योत्यो द्वितीयार्थस्तदाहानपेतीति कृ इति कर्तरीति भावः उपाधि गाधी
ने सप्तमीति यस्मादधिकमित्यनेनेति भावः उपखार्यड्रोणाइतियप्या खार्यपेक्षाधिकत्ववान् द्रोणाइत्यर्थः तेदा भय
मत्सीतिफलतीइत्थंभूत किं चित्प्रकारं प्राप्तः सत्त्राख्यापते ३ नेने तिइत्थंभूतारख्याते प्रकारविशेषनिरूपकं भागरा
केनाशीत्प्राघजं तेन न त्स्वामी उच्यते वीप्सायां द्विर्वचनवि शिष्टवृक्षशब्दबोध्यत्वादाह विषयभूते ष्वितिवृक्षं प्रती
तिवृक्षप्रकाशेन विद्युत विद्योतते शतानाद्धक्षो लक्षणं वृक्षं वृक्षमिति वृक्षस्य ज्ञापकतासंबंधेनान्वयो यद्यपि द्वि
र्वचनबलादेव तथापि प्रत्यादियोगसापितालिंर्णयकृ इति संबंधपरिच्छेदकत्वबोधं वृक्षादीनां सेचनेकर्मत्वे पि
तत्वेनाविवक्षितसेचने पामनेन द्वितीया किं च यद्यत्र कर्मणि द्वितीया स्यात्तन्न हाप्रतिना सामर्थ्याभावात्प्रतिवृक्षमिति समासानुप
पत्तिः किंचप्रत्यादेः क्रियाविशेषणत्वे ३ न्वयंतयाकर्मप्रवचनीयसंज्ञावैयर्थ्यापत्तिः अत एव भाष्ये कि मर्थं पुनरिद

क

मुच्यते नचोपसर्गसंज्ञाबाधनार्थं क्रियायोगाभावादित्युक्ता द्वितीयार्थमिति सिद्धांतितं अन्तरा वप्रत्ययं शब्द निवेश इत्या
दावर्थस्य निवेशान क्रियानिरूपितताधिकरणत्वे पर्यवसमर्थं प्रतीतिविग्रहो भाष्ये दर्शितः वृत्तिविषयेप्रतिरेव वीप्सा अपि द्यो
तकाइत्यन्य दित्या स्तोफलांतरमप्याह अत्रेति यदत्रेति यद्वस्तु मम भागः स्यादित्यर्थः कुतोधीतिकुतइत्यपादाने पंचमी
द्वितीयानु नकर्मप्रवचनीयद्योत्यसंबंधप्रतियोगित्वरूपस्यकर्मप्रवचनीययुक्तत्वस्याभावात् गतिसंज्ञा वा धात्विति
धात्वर्थमात्रद्योतकत्वेन क्रियायोगात् गतित्वं प्राप्तं विशेषद्योतकत्वाभावात्व नर्थकत्वव्यवहारोपीतिभावः सुसिक्तमि
तिसेकगतपूज्यत्वद्योतकः सुः क्रियापूज्यत्वकृते ननत्त्र क्रियाकर्तुः पूज्यत्वे गम्ये एवैषा संज्ञा अन्तराव सुषिक्तं किंत
वेत्यत्र न अतिक्रमणमुचितादधिकानुष्ठानं चान्यू जायामित्यनेनषत्कृष्यते अतिदेवानिति देवेभ्योधिकोदेव
तिवा पूज्य इत्यर्थः द्वितीयेकुगतीति समासस्याभावस्तु अनभिधानात् अप्राप्यनुप्राप्तिरेवन स्वतीपूजायामेवसुक्तेः अ
पि पदार्थे पदस्याऽप्रयुज्यमानपदांतरस्यार्थः पदार्थः सर्पिषोपीति अत्रविंदुरित्यादेः पदस्यार्थोपि द्योत्यः तदुक्तंवृ
तिकृता मात्रा विंदुः स्तोकमित्यस्यार्थेपि वर्तते इति संभावनायां लिङिति उपसंवादाशंकयोश्चेति सूत्रभाष्ये पठि
तेनोपसंवादाशंकयोर्लिङित्यनेन तत्र लोकसाधारणमित्यपि तत्रैव भाष्ये स्पष्टं तत्राशंकोत्प्रेक्षा संभावनाप्युक्त
मव्यभिचारस्य पदस्यार्थ इति तेस्याह पदस्येति अर्थः शक्यः पदस्याप्रयुज्यमानस्य द्योत्य इति तद्वाचकपदाध्याहारेपि द्योत्य इत्यर्थः ३

ह कोटिकसंशकैवेति भावः कर्मप्रवचनीयत्वात्तद्योत्यसंबंधमादृ तस्यारोवेति संभावनाया एवेत्यर्थः कर्तृदेशे लिङ्प्राप्तिरितिष
ष्ठीतत्पुरुषः कर्तृपदं प्रकृताभिप्रायं सर्पिषो पि पिवेदित्यादौ कर्मदेशे लिङेत्यादिबोध्यं तत्र विंदोस्तद्देशे लिङ्प्रयुक्तदेशे लिङ्
स्य संबंधस्य च द्योतकोपि संबध्यतइति स्यात्पदवाच्यक्रियायामपि द्योत्यविंदोः कर्तृतया तद्योत्योक्तसंबंधेन चान्व
यादिति भावः स्तदाह अपि शब्दबलेनेत्यादिना वंच सर्पिरवयवविंदुदेशे लिङ्प्रयुक्तदेशे लिङ्वतीतत्कर्तृकासंभावनावि
षयासत्तेति बोधः विशिष्टसत्तायाः संभावनाविषयत्वबोधे देशे लिङ्स्यापि संभावनाविषयत्वमनुभवसिद्धं ननु एवं
कर्मप्रवचनीयद्योत्ये ऽर्थे सर्पिषो न्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादत आह द्वितीया त्विति नत्वपि
नेति विंदुनायोगेप्यपि द्योत्यसंबंधेनान्वय इत्यर्थः कर्मप्रवचनीयद्योत्यसंबंधप्रतियोगित्वमेव तद्युक्तत्वं प्रकृ
ते चापि द्योत्यस्योक्तसंबंधस्य विंदुप्रतियोगीन सर्पिरिति भावः यदा स्यपदप्रतिपत्तयेपि द्योत्यस्यापि विंदोः प्रयो
गस्तदापि द्वितीयां वाधित्वोपपदविभक्तेरिति प्रथमैव तत्र कारकविभक्तित्वं क्रियाजनकत्वार्थकविभक्तित्वमिति
दिक् संज्ञाफलमाह अनुपसर्गत्वादिति अपि स्तुयादिति पूर्ववल्लिङ् क्रियाविषयेशक्यत्वादिनासंभावनमपि
द्योत्यं प्रकृते ऽवाङ्मनसगोचरं मिंति स्मुमपि स्तुयादिति शक्त्युत्कर्षविवक्षणं अत्र स्तुतिरसंभाव्यार्थे संभावनेसं
भावनपदस्येदृशार्थकत्वे व्याख्यानमेव शरणं विंदुविषयायाः शक्यत्वसंभावने चान्यविषयानि स्वरूपे तथा

ध्याकर्तेर्मितिफलति शब्दस्तत्कर्षमित्यो द्वितो तत्कर्षादेरप्युपलक्षणं अपि वेदान्तपारगं हस्मादित्यादौ दृष्टे ननु क्रियायां संभाव
नाविषयोऽवितो तत्कर्षद्योतनात् संभावितो चितस्य चानुपपत्त्या न मत्वर्थानमप्युक्तमिति अस्य स्वार्थतात्पर्याभावो धर्मशास्त्रो
क्तः संगच्छते कामचारः इच्छया प्रवृत्तिः स्तुहि माघवायेष्वं कुर्विति यावत् प्रैषातिसर्गेति लिङ् अपिस्तुयाद्वृषलमिति
उपसंवादेति सूत्रे पठितेन वार्तिकेन परेणान्तरंगेण च गर्हायां लडपीति बाधित्वा संभावने लिङ् क्रियागतं गर्हितत्वमपि
द्योत्यं वृषलपदसमभिव्याहारात्तु तद्गर्हितत्वं फलति तदेव धिगित्यादिनानूद्यते अपिसिञ्चेत्यादि अपिद्वयेन मिलितेन
समुच्चयद्योतनात् तत्रैकैकस्य तावताऽप्यभावः कालाध्वनोरत्यन्तसंयोगो निरन्तरसंयोगो वेधः स च गुणक्रिया
द्रव्यैरभावेन च तेन मासं संभोजनाभाव इत्यादेः संग्रहः गुणक्रियाभिः कालाध्वनोरत्यन्तसंयोगश्च मासस्त्याकल्या
ध्वप्रवृत्तिभ्यां द्वितीयेत्यर्थः मासमधीत इति तु क्रियस्य यावदेवपर्वसंबंधरूपा व्याप्तिर्द्वितीयार्थः एकादश्यां रात्रौ जा
गरयादित्यादावधिकरणत्वविवक्षणान्न द्वितीया स्वतन्त्रः कारकाधिकारात् क्रियाजनने स्वतन्त्र इत्यर्थस्तदाह ८
क्रियायामिति स्वातन्त्र्यं च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वं पक्वस्तण्डुलो देवदत्तेनेत्यत्र फल
स्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्ययसमभिव्याहारे इति णिचस्तु वाचकत्वमेवाह स्वतन्त्र एपंत धातूत्त
क्तकर्तृधात्वर्थतदुभयवाच्यव्यापाराश्रयः स्वस्वार्थं प्रतिप्राधान्यात् देवदत्तेन यज्ञदत्तः पाचयतीत्यादौ प्रयोज्यव्यापारा

अथ स्थाल्या अपि कर्तृत्वसिद्धिर्यतिकर्त्वेनु नेनन सिध्येत् कारक इति सूत्रभाष्यात् स्वक्रियाकारकप्रवर्तकत्वं स्वातंत्र्यमिति ल
भ्यते प्रकृतसूत्रभाष्ये चेतिमिजन्यायां निरूपितं प्रकृष्येति यथापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टं तमपृग्रह
णं किमिति कारकाधिकारात्करणस्य डुंतमहासंज्ञयैव सिद्धे आधारस्य साधकत्वे लब्धे साधकग्रहणमेव साधकतम
मार्थं भविष्यतीति प्रश्नः गंगायामिति अधिकरणमित्यधिकरणस्य डुंत महासंज्ञयेव सिद्धे आधारग्रहणं सामर्थ्यात्
सर्वावयवव्याप्त्या यत्राधारः सोऽधिकरणमित्यर्थः स्यात् एवं चेदं सूत्रं तिले तैलमित्यादावेव प्रवर्तेत नहि गंगाती
रे वा सर्वावयवैर्मीना तीरधर्मस्याधाराधारत्वस्यात्यंतसामीप्यात्प्रवाहे आरोपोऽत्र बोध्यः यदा व्यवहितो गंगातो
याश्च तदा गंगाशब्दस्य न तीरे लक्षणा तमपृग्रहणेन शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयत इति ज्ञाप्यत इति गौणा
धारस्याप्यधिकरणसंज्ञास्ति अपि तिल एवं गंगायां गाव इत्यपि ग्रहणं सर्वावयवव्याप्त्यभावेन मुख्याधारत्वाभावात्
गौणमप्याधारत्वादिसत्तमस्यादि राक्षसमेवेति बोध्यम् इदं प्रकृतसूत्रे भाष्ये स्पष्टं यदि तु महासंज्ञया न शब्दे प्रकरणा
समर्थं प्रति आधारादि पदं चरितार्थं साधकशब्दस्य यद्व्यापारानंतरमव्यवधानेन फलोत्पादस्तत्र शक्तिराधार
शब्दस्य चाध्रियतेयस्मिन्निति व्युत्पत्त्या कर्तृकर्मणोर्धारणक्रियां प्रति सर्वावयवव्याप्त्या यत्राधारस्तत्र शक्ति

रिमुच्यते तेनदोक्तप्रयोगादिसाधनाय कारकप्रकरणे उद्देश्यवाचके पदे स्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणं वाच्यं स्वरितेनाधि
कार्यमिति सूत्रार्थात् तमपात्तु प्रकृते तदभावो बोध्यते एवं चव्यवधानेन फलोत्पादके करणत्वापत्त्या करणतृतीयान्तप्रयोगस्यासाधुत्व
बोधनं तमप्फलं एतत्तमब्ग्रहणादेतान्यत्र स्वरितत्वमिति ज्ञापनं इति दिक् स्पष्टं चेदं स्वरितेनेति सूत्रे भाष्ये एवमेतेनैव कर्तृ
तृतीयायाः कर्तृत्वादिशक्तिमान् कर्तृक्रियाभावः संबंधश्चार्थः करणतृतीयायाः करणशक्तिमान् क्रियाकरणभावः
संबंधश्चार्थस्तत्र च शक्तिमत्त्वं च व्यापारवत्त्वमेव रामकर्तृककरणकप्राणवियोगाश्रयो वालीति बोधः प्रकृत्यादिभ्य इ
ति द्वंद्वं यथायोगं सर्वविभक्त्यपवादः दिवः कर्म च चेन संज्ञयोः समावेशः तेन दिवः साधकतमस्य शक्तिद्वययोगो
बोध्यते तेनाक्षैर्दीव्यते इत्यत्र तृतीयायाः परत्वात् कर्मत्वाच्चाकर्मकत्वप्रयुक्तपरस्मैपदाभावः अत्र विप्रतिषेधशा
स्त्रबलात् तृतीयैव शक्तिद्वयबोधिका यदा त्वक्षाणामपि फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षा तदाक्षान्दीव्यतीत्या
दि साधु अक्षाणां देवितेत्यादौ तु तृतीयातः परत्वात् कृद्योगलक्षणा षष्ठी मनसा देव इत्यादौ तु हेतुतृतीयान्तेन पचा
घजंतदेवशब्दस्य समासः न च शक्तिद्वयस्वीकारे अत्र कर्मणि लकारे करणत्वराहित्येन तृतीयापत्तिरि
ति वाच्यं अपादानमुत्तराणीत्यस्योदाहरणे गां दोग्धीत्यादौ तत्र कर्मणि लकारे पंचम्यापत्तिवारणायैव द्वयगताते

कृशक्तिमध्येएकस्याभिहितत्वेपरस्यापितद्वत्प्रकाशेनाद्भुतेः एकैवशक्तिः संज्ञाद्वयोपयोगिनीत्येतदुक्तं संकर्मादिपदानांकर्मत्वा
दितत्तच्छक्तिरूपेणबोधकतयातयोर्वौ भेदस्यैवोचित्यादितिमंजूषायांविस्तरः फलप्राप्तिरितितस्यांचसत्यांप्रयोजनाभा
वादेवनक्रियाप्रवृत्तिरितिफलप्राप्तिशब्देनतत्स्वर्गकस्यागउच्यतेत्यागस्यचफलप्राप्तिर्व्यंग्येत्यन्यत्रविस्तरः नायातइति
अनेनफलाप्राप्तिरेवस्फुटमुच्यते सहयुक्तेपृथग्विनानानाभिरितिसहेनेत्येवसिद्धेयुक्तग्रहणं शब्दविशेषानादरेण
तद्योगेभवत्वित्यर्थमाह सहार्थेनेति अन्तरेणकचिच्छद्योगंविनापिभवतिनदाह विनापीति न्यायसिद्धेयंलिंगम्
हवृद्धइतिसहार्थः साहित्यंतच्चस्वसमभिव्याहृतक्रियादिसमानकालकत्वक्रियादिमत्त्वे क्वचित्समानदेशक्रियत्वं
अन्तरेणवमाषवापोत्तरं तत्रैवद्वात्रेति लवापेतिलेः सहमाषान्वपतीतिभवतियद्यपिपुत्रेणसहागतइत्यादेःप्रागमन
नक्रियाकर्तृत्वादेवपुत्रात्तृतीयासिद्धातथापिपुत्रेणसहस्थूलइत्याद्यसंगृहसंग्रहायहरणमितिभाष्येस्पष्टं अंगे
नावयवेनइदंसन्निधानलक्ष्येअंगिनोःवयविनः सत्रेअंगशब्दःशरीरावयववाचीनोव्याख्यानादितिभावः अक्ष्णाका
णइतियद्यप्यक्ष्णेवकाणंतथाप्यवयवधर्मस्यसमुदायेआरोपात्शरीरेतद्वाचित्वेनचव्यवहारोनिरूढइतिध्ये
यंयद्यपिकाणशब्दोङ्गगतविकारवाचकएवतथापिद्वौविशावितिवदस्यापिप्रयोगस्यसाधुत्वंदर्शयितुमिहदर्शनानां
साधुत्वेचेदमेवमानं सप्तम्यपवादोयंमित्याहाङ्गिसंबंधीति अंगविकारःकिमिति अंगेनगृहणप्रश्नः अङ्गिका

णादितिप्रथमांबाधित्वानैवस्यात् लेशतोपिदर्शनसामर्थ्यहीनत्वंकारणत्वंइत्थंशब्दःप्रकारमात्रपरः प्राप्त्यर्थात्तु भुवःक
र्मणि कर्त्तरिक्तः कर्मविभक्त्यंतेनेत्थंशब्देनभूतशब्दस्यसमासः लक्षणशब्दः करणसाधनः तस्यकर्मषष्ठ्यंतेनेत्थंभूत
शब्देनसमासइत्याह किंचिदित्यादि जटाभिरितितृतीयापि ताभिस्तापसोज्ञानइत्यर्थे ज्ञानक्रियायांकरणत्वादिदंसिद्धं
तथापिकरणत्वविवक्षायांलक्ष्यलक्षणभावमात्रविवक्षायांतृतीयार्थमिदंइत्थंभूतस्ययत्रलक्षणवाचकात्स्यषष्ठ्युप
स्थितिस्तत्रैवाननतृतीयातेनकमंडलुपाणिंछात्रमद्राक्षीदित्यादौकमंडलुपदात्तृतीयानचोत्पन्नायात्तृतीया
याः सुपोधातुप्रातिपदिकयोरितिलुगितिवाच्यं क्तेनसमासेनस्याउत्पन्नायाःसमासप्रातिपदिकावयवत्वादितिकेचित्तस्यषष्ठ्यां कमंडलुः
पाणौयस्येतिबहुव्रीहिः परेणकमंडलुपाणिशब्दादत्रतृतीयापत्तिः कमंडलुयुक्तपाणिरूपस्यकमंडलुपाणित्व
स्यलक्षणत्वेनतस्यैवतद्वाचकत्वात् नदुक्तमनुर्लक्षणइतिसूत्रेभाष्येसकृदिमोकमंडलुपाणिश्छात्रादयस्ते
स्यतदेवलक्षणंभवतीतितदेवतस्यकमंडलुपाणित्वमेवेत्यर्थः कमंडलोर्लक्षणत्वेहिसएवेतिवदेत् किंचतन्मध्य
पतितन्यायेनतद्विशिष्टस्यप्रातिपदिकत्वेनतस्यतदवयवत्वोक्तेरनौचित्येनलुकोदुर्वारत्वं अंतरावतरंमत्स्यइत्या
दाविजंतस्योत्तरपदपरत्वायपूर्वंसुपोलुकिउत्पन्नस्यापःसुपोधातुप्रातिपदिकयोरितिलुक् अमविधिसामर्थ्यंतवारितइच

न

एकाच्चोमितिसूत्रे भाष्य इत्याहुः संज्ञा दौवारिकस्य जननेनिग्रहणं तस्याकर्मकत्वादि नदाह ज्ञानातेरितिकर्मत्वशक्तिरेवात्र
तत्तीयार्थः हेतौ हेतुरिह कारणं न शास्त्रीयः तस्य कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीयैव सिद्धं ननु लौकिकहेतुरपि
करणमित्यत आह इध्माद्रीति आदिनागुणक्रिये साधारणमिति न ज्ञानेऽपि वर्त्तत इत्यर्थः करणं तु क्रियाजनकमेवे
ति भावः वैषम्यांतरमाह निर्व्यापारेति करणं तु व्यापारवद्देवेति भावः एवं च करणत्वशक्तेर्भिन्नेव हेतुत्वशक्तिरत्र तृती
यार्थ इति तात्पर्यं स्फुटं भवतीप्रतिपत्तये करणे वैलक्षण्यमाह कारणत्वेति हेतुः हेतुमञ्जावत्तीयार्थः दंडे व्यापारसत्त्वेपि क्रियाज
नकत्वाभावान्न करणत्वं पुण्ये क्रियाजनकत्वेपि निर्व्यापारत्वान्न तत्त्व फलमपीहेति इह एतत्सूत्रोदाहरणे क
स्थितफलमपि हेतुत्वेन विवक्षितमित्यर्थः तस्यापि स्वज्ञानद्वाराजनकत्वादत एतेन च प्रत्यय इत्यादि सूत्रे धुके यदेस्यष्टं न
त्वलं श्रमेण साधो क्रियावाचकपदाभावात् क्रियाया अजनीत्वाकथं करणत्वमत आह गम्यमानापीति श्रमेण
त्यादिपदजन्यबोधविषयापीत्यर्थः ननु अर्थमाणत द्वाचकपदजबोधविषयैवेति भावः अलं शब्दो निषेधा
र्थस्तदाह साध्यं नास्तीति ननु सा अयामित्यर्थे ज्ञानेपि तस्य श्रमेणेति नाम्नार्थेन्वयेन न क्रियात्वमत आह इहे
ति स्ववाच्याक्रियां प्रति स्वस्य करणत्वामित्यर्थः स्यां वं चेद्दर्मिग्रहण इति सूत्रे प्रविशा पिंडिमिति वाक्यार्थैकदेशप्र
योगइत्यादिना भाष्ये इति भिंजषापा विस्तरः आशिषेति आशिषां नो संकीर्णिचाराणां यो व्यवहारः क्रिया

त्वबोधकप्रयोगेणन्यासस्तायस्तसंबंधेनप्रव हारस्यसंकीर्णीचारत्वंन तत्त्वाचकाच्चतुर्थ्यर्थेत्वतीयेत्यर्थः दास्येनि दासिसंप्रदान
कंरतिफलकंदानमितिबोधः इतिततीया सतस्येतिदाधात्वर्थस्येत्यर्थः इदमुपलक्षणं क्रियामात्रस्य कर्मणोत्ति संवंध
मितिशेषः अभिप्रैतिइष्टत्तिकर्मणासंबंधश्चास्वत्वादिरूपः संप्रदानत्वशक्तिमान् संप्रदानचतुर्थ्यर्थः सएवोद्देश्यइत्यु
च्यतेक्रियाकारकभावःसंबंधस्तदर्थविप्रसंप्रदानमितिकर्मणेतिकिंतदभावेपिकर्मणोप्युद्देश्यत्वेनांतरंगत्वात्तस्य
वस्यात्कर्मसंज्ञायांनुपर्यायोभविष्यतिपंसग्रहणंकिंतदभावेक्रियाकर्मणायोःभिप्रैतिब्राह्मणादितस्यैवस्यात्
कर्तृसंज्ञात्वकर्मकविषयेसावकाशानचकर्तुःकर्तृत्वाभावेकथंगोःकर्मत्वंकर्मसंज्ञायांकर्तृग्रहणस्यस्वतंत्रोप
लक्षणत्वात् अतएवसार्थाद्वीयतइत्यत्रकर्तुरपादानत्वेपिकर्मणिलकारःसिद्धः नतुकर्मणोनुक्तावकर्मकक्रिया
द्देश्यस्यसंप्रदानत्वंस्यादतआह क्रियायेतिकर्मरहितक्रिययेत्यर्थः सकर्मकेषुकर्मसंज्ञाअस्याबाधिकेत्याशये
नाह पत्येशेतइतिनचहननादीनांतदर्थत्वात्तादर्थ्याच्चतुर्थ्येवासिद्धेकिमनयासंज्ञयेतिवाच्यं दासगोभ्योसंप्रदानत्वस्य
र्थत्वात्ततत्संप्रदानकंदानमितिबोधार्थंतत्तदबश्यकत्वाच्च अतएवतादर्थ्यचतुर्थ्यादातकर्मणोगवादेःसंप्रदा
नार्थत्वे पिदानक्रियायास्तदर्थत्वाभावेनचतुर्थ्यर्थतार्थस्यदानक्रियान्वयानापत्तिरितिहलाराजःतादर्थ्यैव
चतुर्थ्येनसिद्धेचतुर्थीसंप्रदानेइतिसूत्रंरुच्यर्थानामितिविषयेचतुर्थ्यर्थमितिभाष्येस्पष्टं पष्ठ्येनेतिकर्म

देती यार्थः संप्रदाने न च चतुर्थ्यपि एतच्च दानार्थकयजधातुविषयं परजार्थत्वे तु पष्ठोः करणत्वं मायसिद्धं दे
ष्या दसमितिवि॰ यद्धः अस्मकर्तृकरति अभिलष्यतिकर्त्रपेक्षयान्यदभिलष्यति कर्मतत्कर्मै त्वंकृद्धस्यार्थः यत्कि
ञ्चिद्विषयक प्रीत्यनुकूलव्यापाराश्रयोभिलषति कर्ता हरिर्भक्तिमभिलष्यतीति प्रत्ययात् यत्किञ्चित्विषयप्री
त्यनुकूलः प्रीत्यधिकरणो यो व्यापारस्तदाश्रयो रोचनेः कर्तेति अभिलषते कृच्छ्रपर्यन्त्वाभावात्तद्योगे संप्रद
नत्वमिति भावः स्वदाह हरिनिच्छेति पष्ठीति न च प्रीयमाण पदाभावे तत्रस्य क्रियाजनकत्वमात्र विवक्षायां संज्ञा
तरा प्राप्ति विषये चरितार्थेन परत्वादधिकरण संज्ञया वाधा सिद्धेः कथमेतदिति वाच्यं देवदत्ते रोचते इत्यस्या
प्याप्तेरित्याशयात् तत्सत्वेऽन्यस्य कर्मसंज्ञापवादत्वान्न दोषः गोपीस्मरादिति श्लाघादेः स्तुत्यादिनावोध
नमर्थः स्मरादिति हेतौ पंचमी स्तुत्यात्मानुरागं कृष्णं वोधयतीत्यर्थः यद्वा स्तुत्यानुस्त्या च स्वसखीजनं वोधयति
त्स्थित्वा शपथेन च कृष्णं तं वोधयतीत्यर्थः ज्ञीप्स्यमानपरे एव पर्यकर्मणः प्रकृत्यर्थकर्मण आग्रहणादित्यन्यत्र विस्त
रः स्तुत्यादिमात्रार्थत्वे कृष्णं श्लाघते कृष्णं नुनइत्येव ज्ञीप्स्यमान इति ज्ञाप नवचनाद्रूपेः स नंतात्कर्मणि शानर्
स्तुति श्लाघत्कृष्णमेव राधे वं नुमा स्वानुरागं कृष्णं वोधयतीत्यर्थः नुतिः सपत्न्यादिभ्यः कृष्णस्यैव राधं स्थित्या शापथेन च कृष्णं स्वानुरागं वो

श्रीहरिनामा

जं वो धयतीत्य धारेरुत्तमर्ण इत्यत्र तस्यान्ने इति एषं तस्य ग्रहणं व्याख्यानात् भक्तायेति धियमाणं स्वरूपेणावतिष्ठमानं
मोक्षं हरिः प्रयुंक्त इत्यर्थः प्रेरणाया भक्ता सत्त्वे भावात्तस्यापि प्रेरणजनकत्वेन कारकत्वं बोध्यं अत्र वस्य देयत्वेन मो
हेपि करणत्वं बोध्यं प्रकर्षविवक्षायोग्यत्वेति फलाश्रयत्वे न विवक्षायामित्यर्थः परत्वादिति इदं सूत्रं विषयत्वयाक्रि
याजनकत्वमात्रविवक्षायां चरितार्थमिति भावः पुष्प्यसंप्रदानके ऽक्षेति चतुर्थीसमभिव्याहारे बोधः कुमार्य इवकांत
स्यत्र स्पंदति स्पृहयंति चेत्यत्र क्रियासंबंधित्वमात्रविवक्षया षष्ठी अन्येन भोगायेत्यध्याहृत्य कांतायेति विभक्तिवि
परिणामेन वा व्याख्येयमित्याहुः स्पृह धातुरिच्छामात्रवाची फलावच्छिन्नेच्छावाची चाद्ये संप्रदानत्वमंत्ये कर्मत्वं
ईप्सितत्वं धात्वर्थजन्यफलाश्रयत्वं न तु फलस्य धात्वर्थत्वपर्यंते माग्रहः कर्मसंज्ञायां तु यथा तन्नाभस्तेनो
के भार्यामीर्ष्यतीति नात्र भार्यापतिकोपः किंतु परैर्दर्शनमीर्ष्यितां न सहत इत्येवं चात्र न कोपजन्ये ईर्ष्याकं
त्वन्यपुरुषदर्शनजन्येति भावः हरेः क्रोधद्रोहाभ्यामीच्छाविषयत्वाभावात् क्रियया यमित्यनेन नास्ति सिद्धिः न
त्वकुपितः क्रुध्यतीति भाष्येण प्ररूढकोपस्यैव क्रोधइति कुपेस्तु दर्शित्वाभावेन तद्योगे इदं कुप्यति कस्मै चिदि
त्यसाध्वेव उपसृष्टयोरित्यस्यार्थमाह सोपसर्गयोरिति वैयाकरणनिकाये एवं तन्न दर्शकत्वेन प्रसिद्धः

पूर्वसूत्रापवादोयं वक्ष्यत इति यद्वी यच्छुभाशुभसंबंधीत्यर्थः राधीक्ष्योः प्रश्नविषयपर्यालोचनमर्थः कर्मणः प्रश्नविषय
स्य धात्वर्थेनोपसंग्रहादकर्मकावेतौ अतएवस्यन्त राधोऽकर्मकादेवेत्युक्तेः कृष्णसंप्रदानकं शुभाशुभपर्यालोचनमर्थः
प्रश्नाभ्यां व्याख्यानात् प्रत्येकं निमित्तत्वमित्याशयेनोदाहरति गां प्रतिशृणोतीति तिरात्तयोः प्रवर्त्तनापूर्वकोऽभ्युपग
मोर्थः तत्र विप्रस्य कर्तृत्व प्रयोजकत्वे न हेतुत्वे प्रासेवचनं अनुप्रतीहि भिन्नंपदे लुप्तपंचम्यंतं रणइति एतां ताउ
करणात् षष्ठी शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनमनयोरर्थः पूर्वव्यापारस्येति शं
सनस्येत्यर्थः प्रोत्साहयतीति प्रायमित्यादिशब्देरितिरोषः शंसायेति करणस्यैव संप्रदानत्वेन भानमत्र शं
सव्यापारस्य स्वदानरूपएवेति वोध्यं तादर्थ्ये तादर्थ्यमुपकार्योपकारकभावरूपः संबंधः यदा तादर्थ्यस्य संबं
धत्वेन भानं तदा षष्ठी गुरोरिदं गुर्वर्थमिति अत्र शाब्दस्य षष्ठ्यपीति सप्तमी अर्थग्रहणं चात्र संपत्तिरूप
त्तिः क्लृप्यर्थकधातुयोगे उत्पद्यमानेऽर्थे वर्तमानात्पंच्चतुर्थीत्यर्थः हितयोगे चात्सुखयोगेपि क्रिया
र्थोपि क्रियार्थः फलं यस्य तत् क्रियार्थं तेनस्य वाचकं लक्ष्यते क्रियावीफलकार्यवाचकमुपपदं यस्य
त्यर्थः सोर्थश्च प्रत्यासत्त्या क्रियारूपएवस्यानिराकांक्षाप्रयुज्यमानवाची वैयाकरणानां निकायप्र

सिद्धः क्रियार्थक्रियोपपदत्वं च तुमुन्नादेरेवेत्याह क्रियार्थाक्रियेति फले भोपानीत्यादौ फलकर्मकाहरणफलकं
पानमिति बोधः यथा वाक्यार्थवाक्यैकदेशप्रयोगस्थले प्रविश पिंडीमित्यादौ तस्यैव पदस्य संपूर्णवाक्यार्थे शक्तता
तथा स्वसमुदायस्याहरणघटितोक्तार्थशक्तिरेन च्छाखवलात्स्यातिन इसुक्ते सत्प्रयोगेनेति बोध्यं अयमेवा
र्थो ध्याहारः नमस्कुर्मो नृसिंहायेति नमः स्वस्तीत्यनेन नु न सिद्धिः उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः
पिंडीमित्यादौ अप्रयुज्यमानमाहरणक्रियाकर्मणि च चतुर्थीवारणाय क्रियार्थोपपदस्येति तुमर्थात् तुमुन्शब्द
ततस्तदर्थोल्लंघने सोऽर्थो यस्येत्यर्थः इति सूत्रेणेति भावे ये प्रत्यया घञंते ऽते क्रियार्थक्रियायामुपपदे भविष्य
२ ति स्युरित्यर्थः यागायेति यागफलकं यानमित्यर्थः उपपदविभक्तेरिति वाचनिकमेवेदं भाष्ये पठितमिति के
चित् क्रियाकारकयोः संबंधोंतरंगः उपपदार्थेन तु यत्किंचिन् क्रियाकारकभावमूलकः इति तन्निमित्तावि
भक्तिर्बहिरंगेति अंतरांतरेणेति सूत्रे कैयटः अत्राहुः एवं सति नमस्यति देवानित्यादौ नमः पदार्थे क्रिया
कारकभावेनैवान्वये परत्वाच्चतुर्थीमाशंक्यानेन वारणस्य भाष्योक्तस्यासंगतिः एतेन प्रधानत्वात्
क्रियायास्तत्संबंधनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तं कारकविभक्तित्वं च क्रियाजनकत्वसमानाधिकर

पूर्वसूत्रापवादोयं वक्ष्यइति यदी यस्तभाशुभसंबंधीत्यर्थः राधीक्ष्योः प्रश्नविषयपर्यालोचनमर्थः कर्मणः प्रश्नविषय
स्य धात्वर्थेनोपसंग्रहादकर्मकावेतौ अत एव तत्र राधोऽकर्मकादेवेत्युक्तेः कृष्णसंप्रदानकं शुभाशुभपर्यालोचनमर्थः
प्रत्याङ्भ्यां व्याख्यानात् प्रत्येकं निमित्तत्वमित्याशयेनोदाहरति गां प्रतिशृणोतीति आ तयोः प्रवर्तनापूर्वकोऽभ्युपग
मोऽर्थः तत्र विप्रस्य कर्तृत्वप्रयोजकत्वे न हेतुत्वे प्राप्ते वचनं अनुप्रतीति हि भिन्नं पदं लुप्तपंचम्यंतं गृण इति एनां तानु
करणात् षष्ठी शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनमनयोरर्थः पूर्वव्यापारस्येति शं
सनस्येत्यर्थः प्रोत्साहयतीति प्रोत्साहयिता दिशादेरिति शेषः शंसनायेति करणस्यैव संप्रदानत्वेन भानमत्र श
तत्कापारस्य वा सनरूपएवेति बोध्यं तादर्थ्ये तादर्थ्यमुपकार्योपकारकभावरूपः संबंधः यदा तादर्थ्यस्य संब
धत्वेन भानं तदा षष्ठी गुरोरिदं तद्वर्थमिति अत्र भाष्ये स्पष्टं क्लृपीति सप्तमी अर्थग्रहणं चात्र संपत्तिरूप
त्तिः क्लृप्यर्थक धातुयोगे उत्पद्यमाने ऽर्थे वर्तमानाच्चतुर्थीत्यर्थः हितयोगे चात्सुखयोगेऽपि क्रिया
र्थोप क्रियार्थः फलं यस्य तत् क्रियार्थं तेन तस्य वाचकं लक्ष्यते क्रियावाफलकार्यवाचकमुपपदं यस्ये
त्यर्थः सोऽर्थस्य प्रत्यासत्त्या क्रियारूपएव स्याद् निराकर्तुं प्राप्युज्यमानवाची वैयाकरणानां निकायप्र

सिद्धः क्रियार्थक्रियोपपदत्वं च तुमुन्नादेरेवेत्याह क्रियार्थाक्रियेति फलेभ्यो यातीत्यादौ फलकर्मकाहरणफलकं
यानमिति बोधः यथा वाक्यार्थवाक्यैकदेशप्रयोगस्थले प्रविश पिंडीमित्यादौ तस्यैव पदस्य संपूर्णवाक्यार्थे शक्तता
तथा स्वसमुदायस्याहरणघटितोक्तार्थशक्तिरेव न च व्याख्यावलात्स्यादिति न द्वसुक्ते सत्प्रयोगेनेति प्रोक्तं अयमेवा
र्थो भाष्याहारः नमस्कुर्मो नृसिंहायेति नमः स्वस्तीत्यनेन ननु न सिद्धिः उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः
पिंडीमित्यादौ अप्रयुज्यमानभक्षणक्रियाकर्मणि चतुर्थीवारणाय क्रियार्थोपपदस्येति तुमर्थात्तु मूशब्दे
तन्न दर्थ्यालक्षणे सोऽर्थायस्येत्यर्थः इति सूत्रे रेणेति भाववेयप्रत्यया बस्यंते। तेन क्रियार्थक्रियायामुपपदे भविष्य
२ ति स्युरित्यर्थः यागायेति यागफलकं यानमित्यर्थः उपपदविभक्तेरिति वाचनिकमेवेदं भाष्ये पठितमिति के
चित् क्रियाकारकयोः संबंधो न तरंगः उपपदार्थे ननु यद्विशेषेण क्रियाकारकभावमूलकः इति तन्न भिन्नावि
भक्तिः वहिरंगेति अंतरंगेनतरेणेति सूत्रे कैयटः अत्राहुः एवं सति नमस्यति देवानित्यादौ नमः पदार्थक्रिया
कारकभावेनैव अन्वये परत्वाच्चतुर्थीमाशंक्यानेन वारणस्य भाष्योक्तस्यासंगतिः एतेन प्रधानत्वात्
क्रियायास्तत्संबंधनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तं कारकविभक्तित्वं च क्रियाजनकत्वसमानाधिकर

णकर्त्रीरित्युक्तादिं त्यततमत्वेऽत्र न्याभिहितानुक्तकर्त्तायन्ततमार्थत्वं प्रथमायाऽपि अभिहितेऽप्यमेत्निवार्त्ति कस्मा
न्मुख्यात्तः प्रथमापि कारकविभक्तिरितिवोध्यं द्वाविमादौ द्वित्वादेरिव देवः पचतीत्यादावुभाभ्यामेकस्यैवकर्तृत्वस्य
वोधइतिनतद्वैधापत्तिः नमस्करोतिदेवानितिउक्तार्थनिषेधायः स्वनिष्ठापकृष्टत्ववोधस्यैतत्कूलव्यापाररूप
नमस्कारफलस्यतादृशावोधस्याप्रयतयादेवानांकर्मत्वं स्वाहाद्वेनप्रयोक्ता नमः शब्दस्यसाक्षात्प्रभृतिसूत्रादि
षुवापठेनगतित्वात्समत्वं एकस्यापएवोपपदविभक्तित्वे कारकविभक्तित्वे चायं न्यायइतितुनयुक्तं नमस्यतिदेवा
नित्यत्रैतत्परिभाषायाः सपरभाष्यविरोधात् सहयुक्तेऽप्रधानइत्यादिसूत्रस्थभाष्यविरोधाच्च अलमितीतिऽत्र्वंल
मित्यनेनपर्यायस्यापीनांग्रहणं व्याख्यानादित्यर्थः तत्रज्ञापकमप्याह नमेस्प्रतिऽमउपाऽपिसाधुत्वेवीजंसए
वाभितिदिशा श्रीदिवह्यायामितिव्याशीर्विर्धियत्त्वविवक्षायामित्यर्थः स्वस्त्यर्थः कुशलंमंगलंवा स्वस्तियोग
चतुर्थ्यीअवकाशः स्वस्तिजाल्मायास्त्वितिनत्वकथनेकुशलार्थैराशीष्येत्यस्यावकाशः स्वस्तिभिन्नाःकुश
लार्थाः स्वस्तिवादौ नमसयमपि प्रतिग्रहामितिधेनुंकुटुंबार्थेविशेषयतः स्वस्तिर्भवतुजनेनिसुखंचास्तुनमस्त
वेति भविष्योत्तरेप्रयोगात् मन्येकर्मणि तिरस्कारइतिप्रनादरानादरभावमात्रमपितुनत्रोधर्मी स्य

राजभागेनप्रधानात्वात्तसदेससंभवइति नत्वेतत्परिभाषाप्रवृत्तिरत्र एवनसंप्रसारणाइत्युदाहरणीभूतस्य विग्रहस्या
देर्नानयासिद्धिः अतएवचसंप्रसारणइति सूत्रेसार्थकंनैतस्याःपरिभाषायाःप्रयोजनानीत्ते सूत्रस्यभाष्यस्यत्वयमर्थः
एतत्सूत्रसाध्यानि विग्रहइत्यादीन्युदाहरणानि नैतस्याः परिभाषयाभवंतीति अंतस्यसदेशत्वाभावादिति भावः परस्यैवेति
इर्शादस्यैवेत्यर्थः अःसेरिति अत्राकारेणाकारस्यापिग्रहणं तेनामूहगित्यादिसिद्धिः तत्रह्यासर्वनाम्नइति पूर्वपदातः
स्यात्वं त्यदाद्यत्वेतिमदादीनामत्वविधानाइत्यर्थः पद्वइति अत्रतंत्रेणार्थद्वयेपिसूत्रतात्पर्यंतत्र लक्षणानुरोधाद्भवस्यात्र
त्रप्रमाणाभावान्मस्यतिउक्तंचेतिलत्ववदितिचलीढलूप्यतइत्यत्रयथालत्वेशीगकारयोर्भवनितथेत्यर्थः अत्रादग्रुपङिति
रूपवादिमतेन्याययुक्तंलत्वेउक्तशीघ्रेतन्यायाप्रवृत्तावपि अत्रैतदप्रवृत्तौमानाभावात् अतएवभाष्येइसोनोस्त्रेरितिवा
र्त्तिकप्रत्याख्यानायाथवासेरितिपक्षमुक्त्वायद्येवममूर्धुपङितिनसिध्यति अरदग्रुङितिप्राप्नोति अरदग्रुपङितिभवित
ह्यमनंत्यविकारइतिउक्तं अत्रेतिप्राप्नोतीत्युक्त्वा तत्रास्मिमतिरुक्तात्रइतिभवितव्यमित्येतेनतपरत्वकृत्स्नत्वमितिपक्षेसंमतत्वभा
वोदर्शितइतिभवितव्यमित्युक्त्वाचतत्रशब्देः प्रयुक्तत्वंसूचितमित्याहुः विष्वग्देवयोः किमितिचस्याप्युपलक्षणमिदं
नत्रनरपदाधिकाराद्वेरूपेउत्तरपदइत्यपिहि ष्वगंचनमित्यादेर्वाहृतौ अर्थमप्रत्ययग्रहणमनआहाप्रत्ययइति
नैवेति अन्त्यस्यातःकृइत्यस्यानित्यसमासइत्यनेनोत्तदन्तसमासग्रहणेनोत्तरपदान्तेपि पिकृधात्रूपेउत्तरपदेइ

त्यर्थापत्ता वयस्कादिस्मारो ए वस्पादिति भावः उदर्द्द त्र अत्राचइत्यत्र वर्तते समः सःसमो मिद्धिःतिसमइ गिनिच न कृतं परिभाषा
ज्ञानकृतगौरवापत्तेः तिरसस्ति अल्लोपइत्यत्र शकंध्वादित्वात्पररूपेणाकारः प्राप्नोति चेत् अस्य अल्लोपो लोपाभावो यस्मि
न्नेव तत्त्वाविस्मर्थस्तदाह लुप्ताकारेति तिरश्चेति श्चुत्वे ऽल्लोपस्यस्थानिवत्त्वं न नपूर्वत्रासिद्धीये नाल्लिखेध्यातृपूजार्थस्येति फ
जारूपार्थगम्यइत्यर्थः अतरावाव्याकुलं गच्छतीत्यर्थकें चितं गच्छतीत्यादौन लोपोन अव्याकुलगमनेन च पूजाग
म्यते नत्त्वं च तेरवसोपीइति स्पष्टं मंचोनपादानइतिसूत्रे भाष्यकैयटयोः प्राचइत्यादि चिरंतनादिरूढस्ये जिवो ध्वंएते
नांचेर्गतावितिनियमेनैवसिद्धेर्नांचेः पूजायामिति व्यर्थंमित्यपास्तं न लोपाभावइति जोपधत्वबोधनद्वाराइत्यर्थः
स्पष्टं चेदं परेष्वंचेति सूत्रे भाष्ये अपि तत्र च समवधाने चोः कुरिति कुत्वाभावो निरूपपदात् क्विनिति निपात्यत इति
बोध्यंसङ्गितिवचनाद्वाकुत्वाभावः त्वंस्कोरितिस्कलोपे षत्वस्यासिद्धत्वात्सलोपकृते षत्वं वृश्चेः किपि ग्रहिज्येतिसं
प्रसारणे पूर्वत्वे श्चुत्वस्यासिद्धत्वात्सलोपः सुवृट्क्त्विति चर्त्वस्यासिद्धत्वाड्डुः सीनिवाधुट् निपात्यन्ते अतिप्रत्यया
दाइति शेषः तत्र षष्ठह्नते गुणाभावश्चागमेगी देशाश्च महेः कर्मण्णिप्रत्ययश्च निपातनात् शतृवदिति प्रत्ययग्र
हणपरिभाषया शतृप्रत्ययान्तवदित्यर्थः शतुरनुमइति सूत्रे बृहन्महतो रुपसंख्यानमिति षष्ठादिव्याहृतये ति
य मार्थ्य मिति बोध्यं अत्वसंतस्य चस्त्वर्थे अनर्[जे]ति लुप्तषष्ठीकं पदं कृपदं अधातोरितिपसंतस्येव विशेषणं जशकात

दाह धातुभिन्ने तिङ्गतएवो गिदचामिति सूत्रे गोमत्यन्तरप्रत्यये गोमानिति प्रयोगो भाष्ये संगच्छते अंग विशेषणतया र्थसिद्ध
त इदं तविधेरेवानुवादकं भूतग्रहणं परमिति वचनसामर्थ्यादुपधापदासंबंधे न चारितार्थ्यादित्यभिमानः अयमभ्युच्चय इत्याह
नित्यमिति कृताकृतप्रसंगित्वमात्रेणेत्यर्थः सामर्थ्यादिति वाक्यार्थबोधकाले विरोधाभावेनोपधासंबंधे कृते सामर्थ्यात
पूर्वं दीर्घप्रवृत्तिरेकं कल्प्यत इति भावः धीमानिति न चैकानुबंधकपरिभाषया मनुपोऽग्रहणं सूत्रे तु सर्वादिपठितेन तु नासि
कोकारविशिष्टे भवतु शब्दे चरितार्थम् इति वाच्यम् यकारादेः समुदायानुबंधत्वेऽप्यनो बानुबंधकत्वाभावात् अवयवानां
नांतरीयकतया समुदायोपदेश एवं तात्पर्यमित्यर्थस्यादेचउपदेशइति सूत्रस्य भाष्यसंमतत्वे यदुपदेशप्रयुक्ता
यस्येत्संज्ञा तस्य तदनुबंधकतायाएव स्वीकारात् न चोकारलोपे त्वं तत्वं स्यापत्यभावः उकारस्याश्रयणे तदं बोध्यत पू
वैंगतिस्वीकारात् एतेन नतदाश्रयणेनुवंतमेतन्नाद्गतमित्यपास्तं नतदाश्रयणाभावात् तस्मादनुनासिकोकारविशिष्ट
यउपदिशात् तदंतस्य प्रयोगस्य सदीर्घ इति सूत्रार्थ इति न दोषः नियमार्थमिति धातोश्चेदुगित्कार्यं तर्हि निलोपितो
चेतरे वेति नियम इति भावः अयं च तत्रेन्नलोपिन एवेति नियमेप्यं चातिग्रहणं चरितार्थं तथापि भाष्यप्रामाण्यान्तसा
मान्यापेक्ष उक्तनियमो युक्त इति बोध्यं न न्वत्र धातुत्वात्कथं नुमत आह धातोरिति न चोपदेशिकधातुविषयक
तेनो खाखनवृषणनीत्यादेनुम् इपोतन्याय प्रापणं लोपाकरणपूर्वकं न लोपकरणस्याविवक्षार्थत्वामित्याशयः

एवं तर्हि यमोस्तु किमनेनेति वाच्यम् उपदेशिकत्वानंतर्भावेण सामान्यापेक्षं नियमज्ञापनार्थत्वात्तत्फलं परीणिध्वं दित्सा दावि
वगोमानित्यादि नामधातावुगितश्चेति ङीब्भावः इति दिक् मच्च अद्दे लोपो न स्थानिवत् क्कौ लुप्तत्वात् अत्राचारक्विबन्ती
चीनमतेन वस्तुतो हलंतेभ्यस्तदभाव इतिऋ स्वनघापइत्यत्र भाष्ये स्पष्टं उभेभ्यल्लक्षणानुसारेण गर्गादं उ तत्सायाद्वत्र सम
ढायेवावसमाप्तिरिति साहोभेसमुदितइति दृइत्यत्र बहुलीसिद्धे उभेग्रहणं स्पष्टार्थं यत्तु भेग्रहणसामर्थ्यात्सहभावोपसर्जन
त्वविशिष्टार्थकं तेन समुदितइत्यर्थलाभ इति तन्न अप्रावृदार्थत्वात् शब्दाधिकादर्थाधिकस्य च दुष्टो भाष्यकृतोपहसि
तत्वात् ध्वनितं चेदं तदसति प्रयोजने उभेग्रहणं सहार्थं विज्ञास्यत इति ग्रंथेन भाष्ये अतएव सूत्रशेषे भाष्ये गर्गादं उत्वा
येनैनदर्थासिद्धिमाश्रित्य सहग्रहणं कर्तव्यमिति वार्तिकं प्रत्याख्यातं तुल्यन्यायात् दर्थकत्वेन पराभिमतमुभेग्रहणं च
प्रत्याख्यातमेवेति सुधियो विभावयंतु तत्र घादिशब्दानामेकापाये प्रवृत्तेरेत्सी नित्या द्वावभ्यासलोपे कार्यकालपक्षेन
संज्ञेति न जुस् एकादेशात्पूर्वमायनादिषूपदेशिवद्वचनेनांतरंगत्वादंतादेशोपि सर्वे सर्वपदादेशा इति न्यायेन स्था
निवद्भावेन कृत्वा इ जुसापत्तिः किंचैकादेशे जुसोपवादविषयस्य जायमानत्वेन प्रकस्य चापवादविषयमिति न्या
येन पूर्वमंतिभावाप्रवृत्तेरेकादेशे जुसापत्तिः यथो इशोपूर्वं समुदायप्रवृत्तायाः संज्ञायाः स्थानिवद्भावेनाभ्यासलोपे

सत्वेपि पंचमीसमासेऽस्मिन्कादेशस्य स्थानिवत्त्वात् तत्रत्यवृत्तिरत एव प्रत्ययविधिबनिमित्तो न दोष इत्यलम् नाभ्यस्ताच्छतुर्योग
व्यवच्छिन्नो नमिहाज्झवर्तते सामर्थ्यात् दाह तु मेति दधतः शतरि शपः श्लो अन्याविनिर्दिष्टत्वेऽभ्यासहुस्वत्वे त्नाभ्यस्तयो रित्या
लोपे दददिति त्यदादिषु आलोचनमिह ज्ञानमात्रं अप्यासंदृग्दृशावति स्थिति सदृत्रमन्तं वर्तते यत्वापवादत्वात्क्षितिकुः क्विन्प्रत्य
इति न्यासेन दृष इत्यध्याहारेण वहुव्रीहिफले सिद्धे प्रत्ययग्रहणे नान्यपदार्थांशे वोपसागमभ्वि वहुव्रीहिणा लब्धेता दृशा
दिक्विनंतविषयं लक्षणामचरितार्थमिति भावः खकार इति अघोषमहाप्राणप्रात्नुल्यत्वादिति भावः केयटे तिक्विन्प्र
त्ययस्येति सूत्रस्थं न्यादि असिद्धत्वादिति मघपिजस्त्वापवादोपि कुत्वं तथापि शस्यानिक जश्त्वस्येन तु खस्यानिकस्या
पीति भावः वस्तुतस्त्विदं चिंत्यं प्रत्ययग्रहणस्य वहुव्रीहिमात्रफलकत्वाभावव्याख्यानेनोक्तेः तस्माद्धृषकुं अत्र चुप्रजिकुइ छ
१ अस्य चारितार्थ्यं न जश्त्वषत्वापवादता न युक्तेति श्वेदन्त नमतेतिवदनास्त्वचितमिति दिक् नगीति षडगकाः प्राग्वत् नतुभ्या
मिति दिमाश्लिन शोरिति तुमन्त धातुप्रत्ययेन विधानात् स्पृशो तु अनुदके किं उदकस्पर्शः अंतोदात्तत्वमिति नित्वादाद्यु
दात्तत्वं प्राप्तं कुत्वस्य जश्त्वं प्रत्यसिद्धत्वादाह कुत्वात्पूर्वमिति वौ रुसिपि धातो रित्यतो धातोरिति वर्तते तच्च वीभ्यां वि
शेष्यते पिपठिषतेः क्विपि अतो लोप प्रातिपदिकत्वात्सोर्हल्ड्यादिलोपप्रत्ययलक्षणेन पदांतत्वाद्रुः रुत्वे लोपो न

स्थानिवत् पूर्वत्रासिद्धे तल्लिषेधात् नुम्विड् एको रितिवर्त्तते व्यवधानेऽप्राप्तेरिदं अयमप्यधिकारः अन्तरावनिंस्स्वेत्यत्र धातोः सस्य
नातेनषत्वे अवाय शब्दस्यप्रत्येकं संबंधो व्याख्यानात्तदाह प्रत्येकमिति अपिनाऽव्यवधानेपि नुम् स्थानिके तिप्रकृत सूत्रस्यं हृय
व रट् सूत्रस्थं च भाष्यमत्रमानं वृश्चेति षड् इति सपादसप्ताध्यायिस्थकार्यप्रवृत्तियोग्यतायां त्रिपादि स्थस्याप्रवृत्ते र्हल ङ्यादि
लोपात्तरं विविश स्ड् इत्य वस्थायां षत्वस्यासिद्धत्वात्तसंयोगांतलोपे षड् इत्यर्थः कलोपइतिप दांत संयोगादि लोपस्य संयो
गांत लोपापवादत्वादितिभावः तड़िति तक्षोः क्विपि रूपं ताभ्यामितिरिति लोपस्यस्यात्तक्ष्यात तस्मादो संयोगादि लोपाप्राप्तेः का
ष्टतगेव नास्तिकुतः काष्ठशब्दस्याते तिपरे अप्रघो कयोरिति सूत्रस्य भाष्येण न विरोधः तत्र ऊत्परसंयोगादिलोप भाशंक्य
तयोक्तं तस्य दोषइति क्वौ लुप्तमिति तु न सार्वत्रिकमिति भावश्मन्यत्र विस्तरः कुत्वस्यासिद्धत्वादितिपच् सित्यवस्थायां कु
त्वस्यासिद्धत्वात्तदभावे स्को रित्यस्याप्राप्तेः संयोगांतलोप इतिभावः दिधगिति दादेरिति घः एकाच इति भष् भावः र
विद्वानिति विदेः शतुर्वसावदादित्वात् लघूपो लुकि शतुर्ङित्वात् गुणभावे गित्वान्नुमि से सां तेनिदीर्घे संयोगांत लोपे तस्या
सिद्धत्वान्न लोपोन वसोः प्रत्ययग्रहणेन तदंतग्रहणं भस्येत्यधिकारस्तदाह वसंतस्येत्यादि न च विदेः शतुर्वसो
रेकानुबंधकत्वानस्यैतत्र ग्रहणं स्यात् नालिङादेश कसोरिति वाच्यं वसुसौ देशेन तस्यापि द्व्यनुबंधकत्वात् इति

तः सत्ववचनस्यापि विभक्तिप्रतिरूपकत्वेन तसिद्धेरित्यस्य पाठः विनिगमनाविरहेण विभक्तिप्रतिरूपकत्वस्य शब्दतोऽप्रतीतेश्चाग्र
हणात् तेनैव सिद्धेरिति तु ममपूस्त्रे भाष्यके यट्योः सत्ताकर्तृकेनैव धनवोधादस्तिकर्ये चिदर्थतः साम्यमिति तद्भावः एवं चा
स्तीत्यस्याप्रामाणिकः पाठ इति तत्वं नमासि तिमहसां नमसामिति प्रयोगास्तु सत्ववाचकत्वे वोध्यः प्रतामप्रशामिति प्रता
नितिनांतावयस्यपष्यक पाठसामर्थ्यादपदांतत्वाच्चास्य नत्वाभावः प्रशानिति तिनांतपाठोऽसांप्रदायिकः मांतानुकरणे
नत्वाप्राप्तेः स्वरादौ रुत्वादिवत् कृन्मेजंतसूत्रस्य भाष्यस्वरसोप्येवमेव नञः स्वरादिष्वप्रामाणिकः पाठः अव्यये नञ्कु
[illegible]नामित्यत्र नञ्ग्रहणं त्वकरणीरिति याद्दे परस्यापि कृत्स्वरस्य वाधनार्थमित्याकरः एवं माङः स्वरादौ प्रश्लिष्टः पा
ठः एवं तावच्छब्दा व्युत्पन्नो उपसर्गे विभक्ति अत्र प्रतिरूपकत्वं विनिगमनाविरहादर्थतः शब्दतश्चागृह्यते गये केन वि
नीतो वामित्यत्राव पिवामित्यस्य पुथक्प्रकृतिकविभक्त्येन समानार्थत्वमस्येव स्वरांशेनुनार्थत्वात् संभवान् एतेन युगपत्तती
त्यादिषु त्यत्याश्रयेण युगपदित्यादीनां विभक्तिप्रतिरूपकत्वादेव सिद्धेत्ते ग्गणे पाठो व्यर्थ इत्यपास्तं एवं तदित्यपि लुप्त
षष्ठीकं विभक्तिप्रतिरूपकमव्ययं अतएवाविघातच्चितो योगस्तत्तदर्थे विभाग इत्यादौ समदाक्षीनीति नैकशेषः अवदत्तमि
ति अत्र क्रियायोगेपि अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि सुदत्तमनुदत्तं च निरत्तमिति चोच्यत इति भाष्यवचनेनोपसर्ग
त्वाभाववोधन द्वारा नादेशाभावो वोध्यत इत्याशयः आकृतीति इ अ ह इत्यनीत्यर्थः ओमिति स्वरादिषु तञ्चाश्रउञ्

दचः परत्वायोगादविरोधे न परत्वाज्ञलें तल्लहणेऽनुमितेऽनुगीञ्ग्रहणेन समहूरतिन्यायात् किं चास्या दचः पररूपो
गासंभवेन नात्र नुमद्वयप्रसक्तिः पुनःप्रसंगविज्ञाने सत्यपि ठ मूढ्वये परस्यात्रु स्वारे तस्य कुलग्रहणे नग्रहणात्सर्वस्या
रेद्वयोरनुस्वारयोः श्रुतौ न विशेष इति नपुंसकस्येति सूत्रे भाष्ये स्पष्टं इति हलंतानपुंसकलिंगाः ॥ स्वरादि स्वरादी
नो निपातनसंज्ञेव नुन कृता स्वरादेर्निपाता अव्ययाः स्याद्युत्पत्तेः एतेन चादीनाम व्ययसंज्ञेव कार्येऽपास्त मित्यन्यत्र वि
स्त ॥ स्वरित्यादि अनुकरणान्येतानि तंत्रेत एव निर्देशात् न स्याद्युत्पत्तिस्तेन विसर्गादिकं न स्वरादीनामनेकशक्ति
[illegible] ना स्व अगातः स्वः स्थितः स्वपश्येत्यादि दर्शनात् गणे च तंत्रेण सर्वेषामुच्चारणं उच्चैरित्यादीन्यधिकर
णशक्तिप्रधानानि शब्दशक्तिस्वभावात् हिरुगादीनि क्रियाप्रधानानि क्रियाप्राधान्यं चैषां क्रियायामेव विशे
षणत्वेन स्पष्टं चेदं तद्धितश्चेति सूत्रे कैयटे सायं चिरं प्राह्णे प्रगे अव्ययेभ्य सायंचिरमिति सूत्रस्य भाष्यप्रामाण्याद्वि
रमित्यव्ययम प्रामाणिक मिति परे वदंति तेन नु स्यं तत्र तस्य तद् हेममिति विहितः उपसर्गाच्छंदसीति विहित
स्य छांदसत्वादेव न संज्ञा वस्तुन स्वाचित ऋतेवास्मिन्दवेत ग्रहणे अर्थे अंतरा अंतरेण ति अंतरांतरेणे ति सूत्रे
भाष्ये नयोर्निपातत्वोक्तेः स्वरादिष्वनयोः पाठः प्रक्षिप्तः अस्तीति धनवानित्यर्थके अस्तिमानित्यादौ धनवाचि

पर्व

स्वादिविधौ प्रातिपदिकाधिकारात्तां संज्ञामाहार्थवदिति अधातुरित्यादिपर्युदासो लाघवात् प्रत्ययांतमिति आवर्ति
ते प्रत्ययपरे प्रत्ययग्रहणपरिभाषया तदंतग्रहणं संज्ञाविधाविति निषेधस्तु प्रत्ययस्य यत्र संज्ञा तद्विषय इति भावः
सूत्रस्थे उत्तरसूत्रे चार्थवत्त्वमेतत्संज्ञाफलीभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविबोधकत्वं बोध
जनकत्वमन्यथा धातुरितिपर्युदासेन व्याख्यानादर्थवत्त्वेनैव साहचर्यग्रहणं न सिद्धेरुत्तरसूत्रे कृदादीनाम
नर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात् न च न जिवकृत्न्यायानिसत्त्वज्ञापनार्थं तत् तदनित्यत्वज्ञापने भाष्यसंमतट
ष्टत्तरफलाभावात् अहन्नकांडइत्यादावेतत्साध्यविभक्त्यपेक्षत्वेपि तदितरानपेक्षत्वमस्त्येवेति तत्पर्युदासः सार्थकः
न च तत्केवलप्रत्ययस्य तदुक्तं संख्यायाः अतिशदंतायाः इति सूत्रे भाष्ये न हि लोके केवलेन प्रत्ययेनार्थो गम्यते
केन तर्हि सप्रकृतिकेनेति हरिरप्याह धात्वादीनां विनापि लौकिकोर्थो न विद्यते कृत्तद्धितानामपीष्याः केव
लानामलौकिकः प्राग्विभक्तेस्तदंतस्य तत एवार्थो न विद्यते इति तत एव परसंज्ञासूत्रे तद्ग्रहणस्य संज्ञाविधौ तदंत
विधाभावज्ञापकत्वे कृत्तद्धितेति सूत्रे तद्ग्रहणं कर्तव्यं न कर्तव्यमर्थवदिति वर्त्तते कृत्तद्धितांतं चैवार्थवत्केवलाः

कृतस्तद्धितावेति भाष्यसुपादाय शास्त्रीयार्थग्रहणानुवृत्तिवैयर्थ्येन तदनुवृत्तिसामर्थ्यात् लौकिकार्थप्रत्यासत्तोऽभिव्य
क्ततरोऽर्थः प्रत्ययांतेषु लक्ष्यते सङ्ग्राह्यते इति कैयटेनोक्तं लौकिकं यत्पदं तदर्थस्य प्रत्यासत्तिः शास्त्रकृतत्वे तु तःस्वा
दिप्रकृतेरर्थः प्रत्ययांते सुसु वं तेषु योऽभिव्यक्ततरो लक्ष्यते बाधकाभिः सङ्ख्यान्वयः यत्तु प्रत्ययांतेऽध्वित्यस्य कृदंते ध्वित्यर्थ
इतितन्न तावन्मात्रेणकस्याप्यर्थाभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात् अर्थवत्सूत्रेप्येवमेवेति अनुवृत्ति
सामर्थ्यादित्यनेन सूचितमन्यथानत्सामर्थ्यादित्येव वदेत् पूर्वसूत्रे यादृशार्थवत्त्वग्रहोऽत्राप्यनुवृत्तिसामर्थ्यात्तादृशा
र्थस्यैव ग्रहः शास्त्रीयार्थग्रहणानुतदनुवृत्तिर्व्यर्थी स्यादिति तद्भावः किंच पूर्वसूत्रे सामान्यतोऽर्थवत्त्वग्रहणे न किंचि
पो त्फलं प्रत्युत्पद्यते व्याप्तिदानातिरिक्तं अन्तरेण तद्धितग्रहणस्य नियमार्थत्वापत्तेः ह्रस्वोनपुंसके यत्तस्येति न्यासेनकं
डेइत्यादेर्ह्रस्ववारणात् फलाभावेन वा भाष्योक्तेनान्यत्वाख्यानेऽपं च नाव प्रियदूत्यादेरुपं चनावैत्यस्याने न प्रातिपदि
कत्वे नाप्युत्तरसूत्रे प्रातिपदिकत्वेनुङीवापत्तिः एवं प्रत्ययस्य प्राप्तिरेव नेति केवलं प्रत्ययपर्युदासो विफलः दशदाडि
मानि षड् अपूपा इत्यादि निरर्थकपदसमुदायव्यावृत्तिरर्थवद्ग्रहणफलं न त्रिहि सुपो धात्विति लुगापत्तिरिति भाष्ये
स्पष्टमितिदिक् पूर्वसूत्रेणेति प्रत्ययग्रहणे यस्मादिति प्रत्ययांतत्वाभावादिति भावः नियमस्य सजातीयविष

मधीतेका शङ्कस्ताद्वा स्मरणीत्यत्रापि न ङीप् लक्ष्ये लक्षणस्येति न्यायात् तस्माद्वहुकुरुचरे त्येवत ध्यावर्त्यं तत्र च तदंत विधिं वि
नाप्राप्ति रेव न ज्ञापितेन तु तदंतविधौ प्राधान्यादेतत्तदारंभाच्च स्त्रियामिति ङीप् प्रकृतिविशेषणमेवा तएव धीवा न मतिक्रां
तातिधीवरीतिसिद्धं एवं चापि शालेत्याद्यस्यैव व्यावर्त्यं अनुपसर्जनादिति च सामर्थ्यात् गम्यमाना विशेषणमेवेति भावः
तदंतविधिमिति अणंतादेः प्रातिपदिकविशेषणत्वेणाणंतांत इत्येवरूपमित्यर्थः अन्यथा प्रत्ययविधौ प्रतिषेधात्स
दुर्लभः स्यात् प्रत्ययग्रहणपरिभाषालभ्यस्य तु नायं निषेधः प्रातिपदिकादित्यनेन सहानन्वयापत्तेः तत्फलं कुंभ
कारेयसिद्धिः अन्यथा कुंभकारे य इत्यापद्येत कुंभेन समासे ङीपि कुंभविशिष्टस्यापत्त्येन योगेकार्थ्यैत्तद्योगस्यैव
कुमशावसत्वात् कदाचित्तत्तोपि ट कि कुंभशब्दोकारे वृद्ध्यभावस्याप्यापत्तेः निष्कृष्यैकार्थीभावस्यैव प्रवृत्तिनिमित्त
मितिवत्कुमशासे तद्धितार्थेत्युत्तरपदेसमासविधानात् समुदायेनैकार्थीभावेऽवयवेनापि तस्यैवसत्वात् क्लोतत्
ग्रहणपरिभाषायाः क्लन्मात्रग्रहणे प्रवृत्त्यानतया विशिष्टादेव ङीवुत्पत्तिप्रत्याशा न च तदंतग्रहणेपि कारश
ब्दस्य व्यपदेशिवद्भावेनाणंतत्वात् ततोपि कदाचिन्न ङीपि कुंभकारेयोदुर्वारः किंच समुदायान्ङीप्यपि स्त्रीप्रत्य
ये तदादिनियमाभावेन केवलादपि कदाचिठ्ठकि सदुर्वार इति वाच्यं एतदधिकारादेव ज्ञापकादसहायेएव प्प

तद्ग्रहणज्ञातादामादामिकादामकादामके त्यसिध्यापत्तेः विहितस्येतिव्याख्यानेफलमाह बहुव्रीहेरिति अविद्यमानाख
द्वायस्येति विग्रहे पाक्षिक कवभावे गोस्त्रियोरित्युपसर्जनह्रस्वत्वे खद्वशब्दादपि सुप्यज्ञातादेके सप्लुकि केणइति ह्र
स्वे पुनष्टापि अभाषितपुंस्काद्विहिताकारस्यानिकाकाराभावेनैतद्विकल्पाप्राप्तावुत्सर्गेण नित्यमेवसुप्लुकि प्रत्यय
लक्षणेनभागद्वयस्यसुबंतत्वात् समाससंज्ञायांसमासांताइति शास्त्रबलात्कबंत तस्येत्समासत्वे नोपसर्जन स्त्रीप्र
त्ययांतांतसमासरूपप्रातिपदिकाभावात् गोस्त्रियोरितिह्रस्वाभावे केणइतिह्रस्वे नकपीति निषिद्धे आपोन्यतरस्यामि
तिह्रस्वेकपः प्राग्वर्तिनः खद्वशब्दात्परस्यापो भाषितपुंस्काद्विहितत्वेन तस्यानिकाकारस्यायं विकल्पो ह्रस्वाभावेत
तु अखद्वाकेतीनिभावः अयमेवेति आचारक्विबंतप्रकृतिककर्तृक्विबंतानामनभिधानमेव स्त्रियामितद्ग्राह्यप्रामाण्य
त्वं चस्त्रीगोमत्कृयोधनंयस्यसपंचगवधनइत्यत्रार्थवत सूत्रोक्तार्थवत्त्वाभावात् अजंतस्यप्रातिपदिकत्वाभावे
न ङीप् आपीशालिनाप्रोक्तमधीतआपीशला ब्राह्मणीत्यत्र तु नङीप् प्रोक्ताणः स्त्रियामवर्तनात् अध्येत्रणन्तु
तु अणोकारइतिव्याख्यानेन वर्णाश्रये प्रत्ययलक्षणाभावात् अध्येत्र्यर्थगतस्त्रीत्वमादायतदणनिमित्तकस्य
नप्राप्तिः स्त्रियामित्यस्यवक्ष्यमाणविशेषणत्वात्तदणणस्त्रीत्वेऽवर्तनात् अतएवकाशकृत्स्निनाप्रोक्तां मीमांसा

पदांगाधिकारे तस्य चेति सिद्धेः उपसर्जनार्थमिति एवं चानुपसर्जने आदाचार्याणामित्यात्वं भवत्येवोपसर्जनस्य चारितार्थ्येन
बाधेमानाभावात् अनस्य अनुपसर्जनस्य उत्तरसूत्रमभाषितपुंस्काच्चेति अंतर्वर्त्तिनीमिति नञ्तत्पुरुष इति स्थिते अकचि
कृते अकृते वा नञ्तत्पुरुषे तरंगानपीति न्यायेन तस्य दाघत्वात्प्राक् सुपो लुकि ततो कचि वा पुनर्विशिष्य सुपि त्यदाघत्वे ऽपि
समासात्पूर्वीत्यल्लसुपः परएव टाविति भावः बहुव्रीहौ तु प्रियैतत्का प्रियैतत्कावाकवभावे प्रियैतकदित्येव सर्वथा नेत्वप्रा
प्तिः अनेषकेति अज्ञातैषका नएषकेति विग्रहः पूर्वं नञ्समासे जाता नेषेति असंभवादिति एषाद्वेति निर्देशात्संज्ञोपसर्जनयो
रप्राप्तेरिति भावः अकजरूढ इति एवं च तदाकारस्यातः स्थानिकत्वाभावइति भावः अर्थांतरे त्विति आत्मज्ञातिधनेष्वित्यर्थः
स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इति कोशादिति भावः क प्रत्ययो तत्वादिति तत्र चांतर्वर्त्तिविभक्त्या सुपः प
रत्वं केन व्यवधानादिति भावः संज्ञापूरण्योश्चेति निषेधेन संज्ञाया अपि भाषितपुंस्कत्वबाधनेन संज्ञाभूतेनाभाषि
तपुंस्काच्चेत्यनेन सिद्धिः आत्मीयत्वपुरस्कारेणैव संज्ञाकरणादिति भावः बाध्यं नित्यमेवेति तत्र एक चिकृते आतः स्था
निकत्वाभावइति भावः एवमत्यंतस्वार्थिकका नेपि नित्यमेवेत्वं अकचोत्यंतस्वार्थिकापवादत्वाभावात् निःस्वकेति
स्वस्वानि यस्यां तेति विग्रहः उपसर्जनह्रस्वः टाप् अज्ञातादौ कः अभाषितस्त्रीविषयाच्चेति नोक्तं स्त्रीनपुंसके ह्यमरोक्ता

तेनकृत्यका ध्रुवकाऽष्टलका इष्टकादयः साधवः उदीचांत्विति अत्रापि शकुनाविति संबध्यते तेनान्यत्र नित्यमेवेत्वं सूतकापु
त्रिका पुत्रके सकारसहितः पाठोऽपपाठः कैयटाद्यसंमतः सूतशब्दात्स्वार्थिकन् वृंदशब्दाच्छंदसि गवृंदाभ्यामारकन्निति मत्वर्थी
य आरकन् वृंदारकशब्दो मुख्यवाचि त्रिलिंग इति भावः ङीन् इति शार्ङ्गरवादित्वाज्जातस्येति भावः अन्यत्र सूतकादेरुदी
चांयकपूर्वत्वं चाव्यवहितमेव रावं प्रत्ययस्यादिति सूत्रे कात्पूर्वत्वमपि उदात्तस्वरितयोरित्यादाविवान्तवादेपि निर्दिष्ट
परिभाषाप्रवृत्तेस्तेन कृशशब्दात्के कृत्त्वे इत्वविकल्पो न नेत्यनुवृत्तावपि निषेधविकल्पे विधिविकल्पस्य फलितत्वात्
आर्यकेवेति आतः किमिति उदीचांयकपूर्वाया इत्यत्र वास्तु यकारपूर्वस्त्रीबोधककाकारस्येत्यर्थः सांकाश्यकेन्च नाति
प्रसंगः प्रत्ययावयवत्वेनाकारस्य स्त्रीबोधकत्वाभावादिति प्रश्नः बहुलसंस्कारानुरोधादवयवषष्ठ्येव स्यात्
न च प्रतिपदोक्तस्त्रीप्रत्ययस्यैवात्र ग्रहणं विशिष्य तदनुपादानादित्युत्तरं स्त्रीप्रत्ययस्य किमिति यकपूर्वाया इति स्त्री
लिंगनिर्देशः किमर्थ इति प्रश्नः धात्वंतेति धात्वंत यकारककारपूर्वयोरकारयोरित्यर्थः इत्वमिति शेषः भस्त्रैषा अप
मपि निषेधविकल्पः इत्याहातन्इति अत्राप्यातः स्थाने इत्यनुवर्तते तदंतेनेति येन विधिरिति सूत्रे समासादिविधि भस्त्रादिग्र
हणं च प्रयोजनमिति भाष्यात् अपिना नञ्भिन्नपूर्वाणाम पूर्वाणां च संग्रहः अनञ्पूर्वाणामपीति स्य घार्थ

सा यदा तु प्रक्रियादशायां कर्तोपि कर्मभीष्मादयोपीत्याश्रयणात् कर्तृत्वविशिष्टकर्तृनिष्ठकर्मत्वो[illegible]व पि भीष्मत्वादि
गुणविशिष्टनिष्ठस्यतस्य बोधार्थं ततोपि सा बोधस्तु परस्परं तयोर्विशेष्यवि।शेषणभावे नैवकारकाभ्यां भावनान्वयप्रसक्तिः सा
न्नास्त्वाश्रयद्वारान्वयविषये नितरां परिगणितं भाष्ये प्रत्याख्यातो लिङ् कृतोस्व प्रकृत्यर्थप्रतिपस्यकर्मत्वात्तस्य सर्वस्यापि क
र्मतामाहतुरिति कृतः कर्तुः सुंदरस्यादेनक्रापि द्वितीयेति दिक् शास्यइत्यत्र वदंति कर्मादिपदैर्वाच्यापि न विभक्तिवा
च्यतावच्छेदकरूपेण कर्मादिर्भानमत एवोपगवश्चित्रगुरिति प्रयुक्तं प्रत्युदाहृतं तत्र च संबंधस्य पेनरूपेण षष्ठ्याभानेनैव तद्धि
तांगादिभिः समुदायप्राप्त्याणतादधिकाराभावेच घटादस्यादेः षष्ठ्या वाच्यत्वेन ह्यानामेव प्रातिपदिकार्थपदेन ग्रहणस्यात
त्र द्धितस्येव षष्ठीविधायके शेषपदेन ग्रहणस्यादित्यत्र्यसंबंधस्य षष्ठीवाच्यत्वे नह्येषतया प्राप्तां षष्ठीं वारयितुं स वस्तुतद्धि
कर्तृभीष्मादीति परिगणनफलमुक्त्वा तत्प्रत्याख्याने [illegible]यशेषत्वात्सात्र शेषलक्षणा षष्ठी प्रत्यानभिहितकर्मादिना
मभावाच्च नान्याइत्याशंक्य न केवला प्रकृतिरिति समर्थः कृतो न चान्यो द्यौ त्यघमानाए तमभिसंबंधमुत्सहते वक्तुमिति
कृत्वा द्वितीयमुक्तं भाष्ये तेनोपगवादावपि षष्ठी वारितेवेति तत्पोरप्यश्वस्य दाहरणत्वमेव तदुक्तमनेकमित्यत्र भाष्ये
चित्रगुरित्यत्र षष्ठ्यर्थस्य नियमेन भानात् षष्ठीप्राप्तौ नीत्याशंक्याभिहितः सोर्थो न भवतः प्रातिपदिकार्थः संपन्न इति ग्रयमे
त्युक्तं च नेन न शेषत्वरूपं षष्ठीप्राप्तिबीजमुक्तमंतर्भूत इत्यनेन चित्रग्वादेः संबंधस्येव प्रवृत्तिनिमित्तत्वेन प्रातिपदिका

र्थयोरनयुहणयोग्यतो क्तेतिबोध्यं परेतु शत्यइत्यादौ कारकान्वययोग्यतावच्छेदकसाध्यत्वेनक्रियादेर्भानमतएवनत्रेत
रकारकाणामन्वयः इदंचकर्तृकमिणोरित्यत्रनिरूपयिष्यते एवंघातानंदइत्यादौ यत्कर्मप्राप्तिकर्त्तानंदइतिविग्रहेनो
बोधेसमासतस्थानंदकर्तृकप्राप्तिकर्मीतिपरे धेविशेषणभावबसमासेनैकार्थीभावःकल्प्यःस्यात्तद्वृत्तिविग्रहयोः
समानार्थत्वभंगस्त्र किंचतथा सति बहुव्रीहौ शत्रीहेस्येकधर्मिबोधकत्वरूपसामानाधिकरणस्यहानिः किंचै
वंप्राप्ताभार्ययेसप्राप्तभार्यइत्यादौ ऽवत्वानापत्तिः पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपवस्यमाणसा
मानाधिकरण्याभावात् तस्मात्कालाः परिमाणिनेत्यादौ सत्रभाष्योक्तस्यवृत्तिविग्रहयोः समानार्थत्वस्यनिर्वाहार्थं
चवृत्तिविग्रहयोः प्राप्तिकर्त्तानंदकर्मत्येवबोधः विशेष्यतान्निरूपकत्वबाधेनतुविशेषणभूतप्राप्तेरित्तत्यविवसा
नंस्वर्गिध्वस्तइतिवत्शाब्दबोधस्तुविशिष्टेतदारोपेणोपपाद्यः एवंचात्रशब्दात्कर्मादेः क्रियाजनकत्वेनविभक्तिवाच्य
तावच्छेदकात्मकतशक्तिमत्त्वेनचनभानमतोनविभक्तिप्रसक्तिरतएवगतिकारकोपपदादितिसूत्रेगतिकारकोपप
दादितिकिमर्थं परमंकारकं परमकारकमितिप्रतीकमुपादाययथासंप्रदानादयः शब्दानकारकरूपतांप्रतिपाद
यंतितथाकारकशब्दोपीतिकृदंतान्हि क्रियायोग्यताविशिष्टद्रव्यवाचिनोनतद्रूपतांकारकशक्तिंप्रतिपादयंती
तिकैयटेनोक्तं अतएवनसकर्मत्वस्यनक्रियान्वयनियमः अन्यथाकारकशक्तेः क्रियाविशेषणत्वनियमेनकर्मादि

प्राधान्यानापत्तिः अत्रैतएवं कर्मादिपदैरिव पक्षादिपदैरपि न विभक्तिप्रयोजकरूपेण कर्मादीनां भानं तिङ्कृत्तद्धितसमा
सैरभिधाने इत्यस्यायमर्थः एतैरभिधाने तत्तच्छक्त्यावेशेन न भानमिति विभक्तिप्रसक्तिरत्रैवानभिहितइतितात्पर्यग्राहकं
ध्वनितंचेदं सुपआत्मनइति सूत्रे भाष्ये तत्र हि दृष्टः पुत्रइष्यतेपुत्रइत्यर्थेक्यच्च माशंक्य स्वशब्देनोक्तत्वात्त्वेतिसमाहि
तं इष्टशब्दसामानाधिकरण्यात्तु त्रार्थिकमित्वागतावपिपुत्रइतिसुवंतं न कर्मेराचीति न ततः क्यच् इति तद्भावः स्व
कर्मत्वं तद्वाचकशब्दे न पुत्रगतंकर्मत्वमुक्तं ननु पुत्रशब्दस्य तत्रवृत्तिरित्यद्वराणी सुपआत्मनइति सूत्रस्य कर्मत्व
विशिष्टवोधकसुवंतादित्यर्थ इतितदाशयः वस्तुतः कर्मत्वविशिष्टो योर्थस्तद्वोधकादित्यर्थः इहभवंतइत्यादि
नासमाध्यंतरमुक्तं वाक्ये फले विशेष्यं वृत्तौ व्याप[illegible]तिसमानार्थत्वाभावात्तत्रार्थवृत्तिर्नेती त्याहुः प्राञ्चस्तानुसा
रेणोक्तस्य आयेणेस्यस्य फलमाह कचिदिति पोत्तुं [illegible] अत्र पुनः साधुत्वायेष्यते इत्यध्याहारस्यावश्यकः अन्यथाक्रि
यार्थक्रियोपपदत्वाभावात्कृकादियोगाभावाच्च सुदुर्लभः स्यात् अध्याहारे तु इच्छार्थस्य गम्यत्वेतिसुलभः ॥
विषयवृत्तोपिसंवध्यते तुमिष्यतइतिय त्तदसां प्रतमत्वाप्यमित्यर्थः एवंचाध्याहृततिङभिधानात्तद्वितीया
तादृशेच्छायाश्च प्राप्यत्वं च तद्विषयस्याप्यत्वेनएवमर्थं नारद इत्यवोधि सदृश्याद्देनारद इति श्रीकृष्णी

यज्ञानाकारानुकरणं नारदइत्येतच्छब्दाभिलाप्यमानाकारो बोधइत्यर्थः इति प्रथमांतस्य प्रातिपदिकत्वान्न तत्र द्वितीया॰
अंतरावाधिहरितीत्यादौ समासः तद्वचनसामर्थ्यात्तस्य परिगणनत्वकल्पनैव युक्ता अंतरावाभ्रं अंत्र अपइत्यादौ सप्तमी॰
किंचनिपातेनाभिधानेपि प्रातिपदिकादुद्भूतत्वेन तच्छक्तिमत्वेनैवभानमिति तत्र विभक्तिः सुलभा शब्दशक्तिस्वभावाद्द्यो
धि वार्थस्य द्योतकौ निपातः अंतरावपरिगणनप्रत्याख्यानेपि न दोषः इत्याहुः तथा प्रयुक्तं तत्वं च समभिव्याहृतधात्वर्थप्रधा
नव्यापारप्रयोज्यतद्धात्वर्थफलाश्रयत्वरूपं पराधीनतया विषयं भुंजानेपि भुजिक्रियाफलाश्रयत्वे नोद्देश्यत्वाद्दूर्वं स्व
त्रेरणेवसिद्धेः तदुक्तंभाष्ये आनत्यव्र विषमीप्सितं यत्तद्गुणं प्रतीतितस्माद्धोरात्र्यप्रतीतिदृष्यादाहरणं विषयेंद्रियसंबंधा
दृश्यमानाअपि तेन दर्शनोद्देश्याअपित्वनिष्टदर्शनाएवेति स्पष्टं भाष्यकैयटयोः एवं च तत्र पूर्वेणप्राप्तेवचनं॰
अनीप्सितमनुद्देश्यं तच्च द्वेष्यमुदासीनं च तृणमिति यथास्पृश्यमानस्य गंगादेः स्पर्शादिजन्यसंयोगादिफला
धारत्वं तथात्वं वत्तृणादेरपीति भावः अनीप्सितपदाभावे ईप्सितस्य प्रकर्षहीनस्याप्यनेन संज्ञाप्राप्तौ वारणापत्ति
नामित्यनवकाशं स्यात् तथा प्रयुक्तमिति किं विषेणौदनं भुंक्ते इत्यादौ करणत्वमात्रविवक्षायां विषस्य माभूत् प्रयागा
त्काशीं गच्छतीत्यत्र च प्रयागस्य माभूत् तत्संबंधेन प्रकृतधात्वर्थफलाश्रयत्वरूपत्वाभावान्न दोषः अपादानादिवि
वे॥

शेषैरिति नत्तद्रूपेणाभासमानमित्यर्थः अकथितशब्दोत्राकीर्त्तितपरो नाप्रधानपर इति भावः एवं च पूर्वविधिविषये कर्म
प्रसक्तिपूर्वकं तदविवक्षायां सर्वथा पूर्वविधेरप्रसक्तावेव तन्नेहेति रीतिबोध्यं अपादानत्वादिविवक्षायां पंचम्याद्येव
केन रूपेण तर्हि विवक्षेति चेत्कर्मत्वेनेति गृहाण कारकत्वव्याप्यसंज्ञानां स्वबोध्येऽर्थे कर्मत्वादिशक्तिमत्त्वबोधक
त्वानुबोधेपि तथैव तत्तच्छास्त्राभावे सर्वत्र षष्ठीप्राप्तौ तं वीसां तदपवादत्वेन न तदपवादत्वमात्रेण संबंधार्थकत्वं न युक्तं
अत एव कर्मणि द्वितीयेत्यस्य नैव रूपं अत एवैतत्सूत्रशेषे भाष्ये तेनैवासिद्धेः आद्यसूत्रद्वयपर्य्यमाशंक्येप्सितमा
त्रस्याप्यनेन संज्ञायां वारणार्थानामिति सूत्रस्यानवकाशत्वे माणवकादपि पंचमी स्यादिति ईप्सिततममित्याद्या
रभ्य व्यमिसुरिति एतेन दुहादीनां व्यापारद्वयार्थत्वे क[illegible]शेतिकर्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्मत्वमिति निरस्तं
वदतो व्याख्यातारः अत एव कर्तुरित्यनेन सिद्धिमाशं[illegible]त्यास्यावेयर्थ्यं भाष्ये नाशंकितं कारकमिति क्रियाजनकमि
त्यर्थः नन्वेवं नटस्य शृणोतीत्यादावतिप्रसंगः सर्वथा तत्र तदुपाधेः गीतद्वारा च तस्य क्रियाजनकत्वे न च तस्य कर्मयुक्त
त्वाभावस्तदंशस्यापि परिगणनलभ्यत्वात् नटस्यापादानत्वविवक्षा तु न कदापि आख्यातेति सूत्रे उपयोगग्रहणाना
उपयोगे आख्यातुरपादानत्वाविवक्षाया बोधनात् अतः परिगणनमाह दुह्याच्पचिति कर्मयुगिति कर्मयुक्तं धात्वर्थ

व्यापारात्प्राक् तदनंतरं वा तत्संबंधत्वं तत्र सतिसंभवे प्राक् तत्संबंधमेव ग्राह्यं एतेन स्थाल्यादेरपि तद्व्यापारादनंतरं पयःसं
बद्धत्वेन कर्मत्वं एवं चापादानादीत्यादिशब्देनापादानसंप्रदानाधिकरणेष्वकरणं तु न गृह्यते हस्तादेः करणस्य पयःप्रा
दिकर्मत्वमुक्ताभावात् यद्यपि गां दोग्धीत्यादौ गोः पयस्त्यजति गवा पयस्त्याजयतीत्याद्यर्थे प्रतीत्या कर्तुरीप्सितमित्ये
वासिद्धं प्रधानकर्मत्वं च गवादीनामिति तत्रैव लादिसिद्धिः प्रधानकर्मत्वं च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधा
नव्यापारविशेषणफलाश्रयत्वं एवं तद्विषयेऽपि धात्वर्थप्रतिपादनस्यैव ग्रहात् प्रकृते च पयोनिष्ठविभागानुकूलो यो गोनिष्ठो
व्यापारस्तदनुकूलव्यापारस्य शब्दतः प्राधान्यात् गर्गैः शतं दंड्यंतामित्यत्र गर्गाणामेव तत्त्वं तु दंडधात्वर्थरूपमार्थश्रा
धान्यं तु शतस्येत्यनुदंडपत्वेनाप्रधानगर्गानुरोधात् शतात् प्रवृत्तिरिति न चोक्तिसूत्रस्य भाष्यविरोधः एवमेव प्राकारसि
द्धोदित इत्याद्युपपत्तिः अत एव प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधाने दुहादीनां एवं ते कर्तृस्वकर्म
ण इत्युक्त्वा उत्तरार्धोपात्तातिरिक्ताः द्विकर्मकाः के इति प्रश्ने नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च द्विकर्मकेषु
ग्रहणं द्रष्टव्यमिति निश्चय इत्युक्तं तत्र त्यादिग्रहणं तद्वत्कृषिवन्मम व्यापारद्वयार्थक धातूपलक्षणं एवं चेदं सूत्र
व्यर्थं तथापि पयसापयोनिष्ठविभागानुकूलव्यापारादिरेव धात्वर्थस्तत्रापादानत्वाद्यविवक्षायामन्येनासिद्धक
मा।

मित्यादिमिदमावश्यकं तदाचाप्रधाने दुहादीनामित्युक्तेरप्रधानेगवादावेव लादयः अप्रधानकर्मत्वं चोक्तं प्रधानकर्म
भिन्नत्वे कर्मत्वं तच्चोक्तार्थं गवादीनामस्यैव फलानाश्रयत्वात् गां दोग्धीति अत्र तः स्थितद्रव०द्रव्यनिष्ठविभागानुकूल
व्यापारो दुहेरर्थः तत्र गोरपादानत्वाविवक्षायामनेनकर्मत्वं तद्विवक्षायां पंचमी गोः पयस्यन्वये षष्ठ्यादिकर्मके दुग
वादीनां कर्मत्वाविवक्षया क्रियान्वये षष्ठीनानभिधानात् षष्ठ्यां तस्य स्वान्वययोग्यनामसमभिव्याहारे तन्त्रेवान्वयस्यो
त्सर्गतो व्युत्पन्नत्वम् अत एव तंडुलानामोदनं पचतीत्यत्र घर्षश्चैव पाचिर्विकारयोगे षष्ठीत्येव कर्त्तरीति सूत्रे भाष्येउ
क्तमिति दिक् वलिं याचत इति यदा स्वत्वनिवृत्तिस्वस्वत्वोत्पत्त्युभयानुकूलो व्यापारो याचेरर्थः स्वत्वेवलेर्निरूपकतया
न्वयस्तदानेनकर्मत्वं पूर्वविषयस्यकस्याप्यभावात् [illegible]यात्रापादानत्वप्रसक्तिः विभागस्य धात्वर्थत्वाभावात् यदा च
नादेवापायो भवति याचितायदि ददाति तदापाये न[?]ज्यत इति भाष्योक्तेः अप्रसं।क्षीर्जितपर्यायाक।थिनग्रहणे गांदो
ग्धि गोः दोग्धीति च याचि प्रच्छि भिक्षि योगे कर्मसंज्ञेत्येव व्यवस्थेति च सिद्धांते केचित्तु[?]क्षव्यापारश्चयार्थत्वेनक
र्तुरिति कर्मत्वं वा धर्मं वसुधया स्वामित्वसंवेधात् कर्मयुक्तं अविनीतमिति याचेः स्वीकारानुकूलव्यापारोर्थः स्वीका
रश्चेदमवश्यं करिष्यामीति शब्दप्रयोगजनको व्यापारविशेषः विनये न च तद्विषयज्ञानवत्त्वं संबंधः तंडुलानिति

तंडुलान् विक्लेदयन्नोदनं निर्वर्त्तयतीत्यर्थस्य कर्तुरिति सूत्रस्य भाष्ये केयट संमतत्वेन कर्तुरित्येव कर्मत्वसिद्धेरस्येतदुग्धहर
णत्वं चिंत्यं एवं स्वसंप्रदातक दानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थेदंधादियोगेपितेनेव सिद्धं एवं व्यापारद्वयार्थ
त्वेन सति प्रयोगेव रूतां धातूनां द्विकर्मकत्वं वोध्यं व्रजमिति निर्गमप्रतिवंधपूर्वकं पतिंकाचिदधिकरणकं चिरास्थित्यनुकू
लव्यापारो वरुधेरर्थः व्रजे गो स्तिष्ठति तत्र तांनिर्गमप्रतिवंधपूर्वकां चिरं स्थापयतीति संप्रन्मपात् अधिकरणत्वाविवक्षा
याम नेन कर्मत्वं व्यापारद्वयार्थत्वेन कर्तुरिति कर्मत्वं पथ्ययनमिति जिज्ञासाविषयार्थज्ञानानुकूलः के नपथा गंतव्यमित्य
भिलापादिरूपो व्यापारः पृच्छेरर्थः ज्ञानविषयत्वेन पथः कर्मत्वं माणवके नच तज्ज्ञाताश्रयत्वसंवंधः अपादानत्वं
नात्र नप्रश्नादेवापायो भवति पप्रच्छ सो यथा च षेपायेन गृह्यते इति भाष्योक्तेः संप्रदानत्वमपि न कर्मसंवंधत्वेनेच्छा
विषयत्वाभावात् व्यापारद्वयार्थत्वेन कर्तुरिति कर्मत्वं वृक्षमिति विभागपूर्वकादानेच्छत्वं स्फलान्यादत्ते इत्यर्थात्
अपादानत्वाविवक्षायामनेन कर्मत्वं धर्मंब्रूते इत्यादि ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारो व्रूञर्थः प्रवृत्तिः पर्य
वसायी सस्यासेः स च धर्मं कुर्वित्यादि विधिघटितोपदेशरूपः विषयता च फलतावच्छेदकः संवंधः वचनादिकर्मणा
धर्मेण माणवकस्याभिप्रयमाणत्वात् तस्य संप्रदानत्वं तद विवक्षायां चातेन कर्मत्वं अत्र कर्तृव्यापारानंतरं तज्ज्ञाताश्रयत्व
रूपो माणवकस्य धर्मेणा संवंधः नयतेः संयोगानुकूलव्यापारोर्थः स एव स्कंधग्रहणादिपूर्वो वहेरर्थः गत्यनुकूल

परस्मिन्निति स्थानिवत्त्वाद्व्यवधानमेवापि परतोऽकारस्य कार्यं वै स्पष्टमेवापि निर्दिष्टपरिभाषोपस्थितेर्व्यवहितेन प्राप्नोतीति वाच्यं
श्रानंतर्यं शेषोपस्थितावपि येन नाव्यवधानमिति न्यायेनाकारव्यवधानेपि प्रवृत्तेः रपकश्चादौ च नातिप्रसंगः केति संघातग्रह
णत्वेनिकाइत्याद्यसिद्धिः अकच्यकारस्योच्चारणार्थत्वे पाकशब्दाभावात् न पासयोरिति ज्ञापके स्यवर्णग्रहणमित्येव ज्ञाप्यते
अकज्विधायकस्य मकारवैशिष्ट्यमादाय त्वप्रवृत्तिज्ञापकत्वात्मपरेणानुगो रवं तावत्तादिविशेषणस्य त्वाशगनुपपत्तेम्ब
न च वर्णग्रहणपक्षे एतिका इत्यादावकारद्वयविधानात् दित्वाप्राप्तिः द्वयोरकारयोरेकादेशे टापासहैकादेशस्य स्थानिवद्भा
वादेकेनैवाकारेण व्यवधानात् पुनः स्थानिवत्त्वं तु नलक्षणस्य सकृदेव प्रवृत्तेः टापासहैकादेशस्य स्थानिवत्त्ववि
नापि वैकादेशस्य स्थानिवत्त्वं वकुमशक्यं तस्य टावैकादेशेनापहारेण दर्शनात् अन्तरङ्गत्वान्नयासयोरितिनिषेध
स्यापि कस्यग्रहणं तु स्य प्रार्थके च लकारस्य प्रत्ययस्याभावात् अनुपदमिति वहुव्रीहिणा नाङ्गविशेषणं वहुव्रीहि
के त्वादाविप्राप्नापत्तेः प्रत्ययलक्षणेनाङ्गस्य प्रत्ययत्वान्न लभते तिनुनात्र लुमता लुप्तप्रत्यये परेऽङ्गस्य कार्ये नतलि
षेधप्रवृत्तेः इदं तु टाप्यंगमिति दिक् सर्विकेति अप्रत्ययस्थेनाम्नामिन्यकच्कारिकेति कटोरेरेव लम्बोदरादा त्वा
र्थीकः सुपः परोनेति प्रसज्यप्रतिषेधेन व्याख्यानेफलमाह बहुपरिव्राजकेति पर्वदासे हि समुदायस्य सुपः भिन्न

त्वेन भुवं तभिन्नत्वे नच ततः परत्वादित्वं दुवीरमिति भावः परिपूर्वाद्वृजेर्व्वालिवरु व्रीहेरुपो लुक्यपि प्रत्ययलक्षणे नापः भुवंतास्पर त्वं
द्वोध्यं कहूकेति आपासह सवर्णे दीर्घात्पूर्वं वार्णे इंगस्य वलीयस्त्वादपवादत्वाच्चांत्यककारादुत्तरस्याकारस्येत्वं स्यादिति भावः
मामकेति कस्य प्रत्ययस्य त्वाभावाद प्राप्ते वचनं ममेयमिति विग्रहे युष्मदस्मदोरन्यतरस्यामित्यणि तवकममकावेकवचने
इति ममकादेशे आदिवृद्धिः नराग्निति केशाद्वइत्यस्मादेच उपदेशे इत्यात्वे आतोनुपसर्गे इति के आतो लोप इटि चेत्याल्लोपः
नपास्वोः प्रत्ययस्यादितिप्राप्ते निषेधोयं यकेति रातन्नदेरक च्चस्यदापत्वे यापसन्निपात परिभाषाऽस्मादेव निषेधाल्लि
ङ्गविशिष्टानित्येति तद्विरोधात्कपं टाविति नशंकं तकन्श्चेतिमदस्तिकनिति इत्व भूत निर्देशेन ज्ञापकेनास्येत्वं वारयितुं श
क्यमिति भाष्यकृतः पंचभिर्मृत्तिकाभिः क्रीतइत्यर्थे पंचमृत्तिकइत्यस्यानभिधानमिति तदाशयः अन्यत्रस्त्रिक तिकृत्तिर्मकारो
च्चारणादित्वं नेति नवकुंशकं पंचोपच्चकोग्रामइत्यादावकारश्रवणं नापत्तेः टापोलुकि प्रत्ययलक्षणेनास्यात्रित्वं चन
तु नमयोरपि लुमतेत्यनेन निषेधात् अप्रत्ययकतोत्ता दोवार्तिकमते पिगुणेन इत्यन्यत्र विस्तरः आशिषिवु अस्याशी विविहि
तस्य वुतोऽस्यत्वं नेत्यर्थः जीवतादित्यर्थे आशिषिचेति वुन् देवदत्तशब्दाद नुकंपायां कन्न जादेश्चविभाषालो
पोवक्तव्य इति दत्तशब्दस्यलोपः देवदत्तकेनुपन्यासस्तु दत्तलोपमभिप्रेत्य धुवकेति धुस्यार्थ पचाद्यच्चिकुणादित्वो
गुणाभावे उवड् नन्नप्राप्यज्ञातताद्यर्थकः कणइति तु तः उनप्राप्च्चेः संज्ञायां कुन् वार्तिकात्कगणाश्चाकृतिगणा

रोधादिति भावः तेन पादयतेः क्विबंतस्य ग्रहणं न क्विपदीति दीपादावस्याइति बहुव्रीहौ संख्यासुपूर्वस्येति पादशब्दांतलोपस्त
तो ङीपि पादः पत् इत्यादि पूर्वसूत्रप्राप्त ङीपो णवाद पइत्ति प्राज्ञ्यस्तत्त्विंत्यं शेषादिभाषेतिसूत्रस्थ भाष्यविरोधात् तत्र हि प्रति
पदविहितसमासांतानां कपो वैकल्पिकत्वेन कब भावे सावकाशत्व मुक्तं तद्वितीयाद्यस्यापि पूर्वसूत्रस्यैव कल्पिकत्वेन तदभा
वे सावकाशत्वात् बहुव्रीहेरूधसइत्यत्रापि भाष्ये स्पष्टमेतत् अतएव प्राप्युत्तिपदिकादिति सूत्रे भाष्ये दशदसमासार्थमका
रांतपदशब्दमंगीकृत्यैतद्भाष्यं त्याख्यातं सूत्यतेच द्विदसिनस्यासप्रमाहारमेकं पदमेकः पाद इत्यर्थ इति च भाष्यात् संगच्छ
ते नत्वपि हि कच्छपिरकपदी एकपादीती ध्वनरांचचेकया । द्विगित्यस्य सूत्रमतेनासिद्धये टाबृचीत्यत्राप्यन्यतरस्यां ग्रहणमनु
वर्तिपादंतस्य ऋच्येनभिधानमिति तु न भाष्याशयः ङीबंतप्रयोगस्य सूत्रीत्यैवासिद्ध्याप तेरिति वोध्यं केवलपाच्छ
दस्याखियां अवि वासंभवेनात्र तदंतविधिः असिद्धत्वादिति भ्रापः परिगणीत भावाल्लतत्र न लोपासिद्धत्वं इत्यंच
कार्यकालपक्षे अपेनिषेधः स्त्रियपंचाद्रीपदीत्यादौ तदंते पि स्त्रियां प्राप्नोतितत्र त्यर्थाद्विकुपधे तिङीपि वनेति वोध्यं
ध्वनितं चेदं भाष्ये परेतु अन्तर्बहिरंगासिद्धत्वाप्राप्तिन लोपस्यतत्त्वाभावात्संज्ञाकृतबहिरंगत्वानाश्रयणान्नपं चेम
नर्गासित्रियां प्राप्नोतितत्त्वेत्यर्थी प्रमाणवलाद्भूतपूर्वषट्त्वाश्रयात्निषेधः अतएव षट्संज्ञायान लोपासिद्धत्वस्यत

फलमितिनलोपसुबित्यत्र भाष्ये उक्तमित्याहुः मनः नङीविति अप्रंपेमनइतिचोक्तरीत्या ङीपोरुभयोरपि निषेधः रातेनसीमभ्यांव
रुमज्वभ्यांव हुधीवभ्यामि॰ त्यत्र डाप्ङीपोरभावेन लोपेडाप्दुवीश्वरइत्यपास्तं डाबुभाभ्यां उभाभ्यांग्रहणाभावे संनि हितस्या
नएवातद्वृत्तिः संभाव्येतवचनसामर्थ्यात् डापूनिषेधयोः पर्यायेसिद्धे ऽन्यतरस्यामितिस्पष्टार्थं भाष्येत्वन्यतरस्यांग्रहणंवा
क्याभेदनानोबहुव्रीहेरित्यनुवर्त्यततः पद्मेक्षलेभ्यइतिङीवर्थंएवंचानउपधेतिसूत्रे नियमार्थमितिवद्धहुधीवरीत्यत्र अन्ले
भ्यइतिङीपिनितत्सन्नियोगे नरफादेशः सिध्यतीतिबहुव्रीहेर्वेतिवचनं प्रत्याख्यातं अनउपधेतिच अन्लेभ्यइत्यस्यैवानुवा
द इतिनियमस्यविधिमुखेनप्रवृत्तावपिनदोषः अनः बहुव्रीहेरिति संख्याव्ययादेरित्यतो ङीविति चानुवर्त्तते अनुपसर्जना
दित्यनुवृत्तमप्यत्र न संबध्यते तस्यंगस्यमाणविशेषणत्वात् गृह्यमाणस्य चानेन बहुव्रीहावनुपसर्जनस्यासंभवात् ध्वति
तं चेदं वनोरचेतिसूत्रे भाष्ये तत्रह्यनो बहुव्रीहेरित्यनंतरमुपधालोपिनोवेतिन्यासोदर्शितः विध्यर्थमिदं अन्यतर
स्यांग्रहणंत्वनुपधालोपिसुपर्वेत्यादौ सावकाशयोः ङीप्प्रतिषेधयोरुपधालोपिन्यनवकाशेन ङीपावाधो माभूदि
तिअन्यन्यथाविधानसामर्थ्यान त्रपाणांविधेयासिद्धेनैतदेपर्यस्यष्टमेव ककारादिति अनेनवर्णमात्रविवक्षितेअकार
उच्चारणार्थ इतिसूचयति नचकारिकेत्यत्राकारेणव्यवधानादाप्परककाराभावेनेत्वानापत्तिरकादेशोप्यचः पर

तत्केनेनाप्रधानत्वात्स्यप्यमानिर्दिष्टत्वाच्चपेनोः पूर्वनिपाते विशेषणसमासेतु गोरितिभेदः स्यादिति भावः ।
अरिनाभोऽस्यास्येत्यस्येत्यादि संग्रहः पेत्युपसर्जनसंज्ञामलब्धानाश्रयंते तेते षष्ठीसमासे पूर्वनिपातानियम।
इति तद्वारणाय निपातवणसमासस्तु स्यादेवेतिकेचित् परेतु प्रथमानिर्दिष्टमिति स्रादिसूत्रभाष्योक्तरीत्या
षष्ठीति सूत्रे प्रसमासस्याप्ये नसुवेतेन समासस्तदर्थनिरूपितसंबंधापर्यवसायाग्रहणमेवेवचनप्र
॥क्ते समप्राप्तिरिति समानाधिकरणग्रहणाव्यर्थमेवध्वनितं चेदमत्र भाष्ये तथा च भाष्यं समानाधिका
॥रणेति किमुदाहरणमेकदेश्याह राज्ञः पाटलिपुत्रकस्य प्रक्षालन्नैतदस्ति असमर्थत्वादेवन भविष्यति उक्तआ
॥शाय उदाहरणान्येकदेश्याह कपयमसाय्यै प्रश्नेकदेश्याह समानाधिकरणमसमर्थवदिति उदाहरणावा
। घेकदेश्याह अथालभिहितमितितच्छेपास्सर्पिषः पीयमानस्येत्युदाहरणमिति उपसर्जनसंज्ञासूत्रस्थभाष्ये
कवाक्यतयासैवं व्याख्यानस्यैवोचित्यादित्याहुः व्याख्यानात्स्वजायामिति सूत्रोपलक्षणमित्याह मतिवुद्धि
तिराद्धांमतइति क्तस्य च वर्तमानेइति षष्ठी अत्रापं चकारकषष्ठी शेषषष्ठ्योरुभयोरपि समासस्यनिषेधः तयोः
समासयोस्यापादित्वरसमासस्वराभ्यामंतोदात्तस्यैव प्राप्तफले विशेषाभावाज्ज्ञप्तनपन्नाह भूते क्तांते नेत्यादि
नच वर्तमाने क्तोऽभूतेक्तस्य वाधकस्तत्कोऽपि न्यायापादितिवाच्यं भूतेक्ते वप्रयुक्तं प्राप्ते वर्तमाने क्तस्यानारंभात्भू

१५२ तत्त्ववर्त्तमानत्वयोर्युगपद्विवक्षाया असंभवात् दध्रिदावश्यं प्राप्तेतक्रदानारंभात् युक्तस्तेन दधिबाध इति बोध्यं
कर्मणि च अस्यक्तेन न संबंधः पूजायां प्रतिषेधानर्थक्यात् तदाह कर्मणीति याषष्ठीति च पाठ इतीन्नस्यार्थइ
तिभावः एवं च क्तस्यानुवृत्तिरेव इदमभिप्रेत्य केतिधात्वर्थनिर्देशे एवुल्लेकर्मणि षष्ठ्यासमासः कर्त्तुः प्रयोगा
भावान्नोभयप्राप्ताविति स्यस्याप्राप्तेः कर्मणि चेति निषेधो न शक्यः पर्यायमाहणोत्सर्जनिष्ठ्विति भावे एवुजि स्यास्य पस
र्थ्येति प्रसिद्धत्वेन तस्यैव तत्र ग्रहणादिति भावः कैयटइति प्रसासस्याकारकषष्ठ्यैव तन्निषेध इति भावगुण
विशेषक इति भाष्यप्रतीकमुपादाय व्याख्येति सूत्रे कैयट एतत कर्त्तरि च अत्र सामर्थ्यात्कर्त्तरीति षष्ठ्यार्थएव
विशेषणं भवतः स्याथिकेति पर्यायेणैवं च धात्वर्थनिर्देशे एवुल्ला नित्यं क्रीजीविकायां निषेधस्यासिद्धेर्नित्यग्र
हणं व्यर्थमित्यत आह तानां लिखिते स्यादेः जीविकायांत्वो नभिधानात्क्रीडायांतु चासंभवाद्विधिच्छिन्नत्वात्तत्स्या
त्रासंबंध इत्याह केनेति अकेजीविकार्थ इत्यत्राकग्रहणं लृर्थ्यग्रहणं वत्स्यच्छार्थं प्रतिपदोक्तत्वेनैतद्विहित
समासएवैतत्प्रवृत्तिसिद्धेः संज्ञायामितीति यद्यप्यत्र धात्वर्थनिर्देश इत्येवं सिद्धं संज्ञायामिति ल्युधिकरणार्थ
मिति कृदन्ते वक्ष्यते तथापि तदर्थस्याभावेपि प्रवृत्तिर्न्याय्या संज्ञायां विशेषविहितत्वात् अचारितार्थ्याभावेपि तस्य
प्रयोजनं बुध्यारोहण प्रयोजनं प्रवृत्तौ नियामकत्वमस्तीत्यन्यत्र प्रपंचितं संज्ञायामिति एवुलि इत्येव पाठः उदाहरणं
णेसहितत्वे षष्ठी समासप्रसंगेन तदपवादमेकदेशिसमासमाह एकंपरेति अयमभिसंधिरवयवपदापेक्ष

केऽद्वितीया नापि समासान्तरे द्विटकमिति द्वितीयान्तस्याश्रिताद्यधीनतास्वमन्यत्रापि यस्य शब्दस्य समासविधौ यत्प्रथमानिर्दिष्टं तत्प्रतित
दुपसर्जनमिति वक्तव्यमिति वार्तिकप्रत्याख्यानाय तद्भाष्यप्रवृत्तेः भाष्येऽविधेः शब्दः प्रतियत्प्रथमानिर्दिष्टं मप्रधानेन तच्छब्दः प्रतित
त्प्रथमानिर्दिष्टवाच्यपदं तदुपसर्जनमित्यर्थः स्यैवौचित्यात् अत्र तदेव यद्यदिति भिन्नलिंगनिर्देशः बहुव्रीहौ त्वेकविभक्तीत्येवोपसर्ज
नं पूर्वमित्यत्र कैयटस्तत्रेत्युक्तमेवेत्यलं प्रथमानिर्दिष्टत्वमिति तन्नोपदमेव स्फुटीभविष्यति अन्वयविरोधान्नातेनेति भाष्यसिद्धान्त इति बोध्यं
यत्तु अर्थगता प्राधान्येनान्वयित्वे विपूर्वं कापादेन हो बोन्वयसंज्ञा हि यत्र सोपि संभवति तत्र प्रवृत्तिनिमित्तापेक्षा: प्रवर्तते न्यत्र तु विधान
सामर्थ्यात् तन्निरपेक्षा: यथा स्वादीनां कर्मप्रवचनीयत्वमिति प्रथमानिर्देशसामर्थ्यात् स्वादीनां प्रवर्तते इति तत्र निर्विभक्तिकस्योच्चा
रणासंभवेन तेन तत्सामर्थ्यायोगात् प्राप्त्यभावान्नित्यार्थकत्वाल्लघुत्वाच्च प्रथमैवोच्चारिते त्यस्य च कुशाक्यत्वात् इत्यलं उपस
र्जनं पूर्वं समास इत्यधिकृते योऽप्युक्तावले न सप्तम्या विपरिणम्यते तदाह समासे इति न च राज्ञः कुमार्या इति परिनिष्ठितवि
भक्त्या समासे कुमार्या अपि पूर्वनिपातापत्तिरिति वाच्यम् षष्ठ्यन्तयोः समासे पर्याभेदात् प्रधानस्य पूर्वनिपात इति भाष्ये
ण समाधानात् अर्थाभेदात् अर्थस्य प्रधानस्याभेदात् संभवस्मान राजपदार्थेन रूपितं संबंधाभावात् अत्र स्य षष्ठ्यंतस्य प्रथमानिर्दि
ष्टत्वाभावात् पूर्वनिपात इति तदर्थः अयं भावः षष्ठीत्यादिसूत्रे पेन सूत्रेण तेन समासस्तद्घटकनिरूपितसंबंधाघटकमेव विवक्षितो
भिधानेनाप्रधानेन षष्ठ्यंतं गृह्यते तद्विवचनं तत्र प्रथमानिर्दिष्टमिति तदुक्तं कैयटेन राज्ञः पुरुषः इत्यत्र राजा पुरुषापेक्षया प्रधानमेव
तिनाभिधीयते राजापेक्षया न व्यतिरिच्यते इत्यप्रधानस्यैव पूर्वनिपात इति उक्तरीत्या प्रधानषष्ठ्यंतमेव तत्र प्रथमानिर्दिष्टं प्रधा
नमिति तद्भावः प्रत्युपसर्जनसंज्ञान्वयित्वादप्रधानस्यैवेत्युपसर्जनं पूर्वमित्यत्र कैयटस्तत्रेत्युक्तमेवेत्यलं प्रथमानिर्दिष्टमित्यतो

चरूनां समासस्तु तद्धितार्थेत्यनेनोत्तरपदे द्विगुविधानात् ज्ञापकात्सिद्ध इति चोक्तं एवं चोत्तरपदेन परिमाणिनेत्यपि प्रत्याख्यातं ७ ख्ल

२२ नुवृत्तं समास इति तदर्थो विग्रहपरस्मिन्त्याह विग्रहे इति नियतेति एकग्रहणादवधारणागर्भसमासलाभ इति भावः निष्कौशाम्बिरित्युदा
हरणे परिनिष्ठितविभक्त्यापि समासेन निष्कान्तं निष्क्रान्तेनेत्यादिक्रमेण तस्यानियतविभक्तिकत्वप्राप्तौ शाम्बीपदस्य तदपेक्षयानियतवि
भक्तिकत्वेनेनोपसर्जनत्वे ह्रस्वत्वं परिनिष्ठितविभक्त्या समासे त्विदमेव ज्ञापकं अव्ययं पदंस्तु रूपे समासार्थे विग्रहे प्रत्यासत्त्या समासापे दो
यानियते तुल्यार्थेति सूत्रे भाष्ये प्रथमान्तेन समास इति पक्षोप्यनेकमिति सूत्रे भाष्ये इति केचित् परे तु अनेकमिति सूत्रे भाष्ये समासार्थविग्र
हे प्रत्यासत्त्या समासापेक्षयानियतविभक्तिकस्यानेनोपसर्जनत्वं एवं च राज्ञः कुमारी राजकुमारीत्यत्र परिनिष्ठितविभक्त्यापि समासस्य सत्वा
त्तदपेक्षया कुमार्या नियतविभक्तित्वमिति न तस्य उपसर्जनत्वमित्युक्तं चित्रगुरित्यत्र च गोपदस्यानेनोपसर्जनत्वमङ्गीकृत्यानेकग्र
हणप्रत्याख्यानं अतिप्रसंगस्त्वनभिधानान्न तदुक्तमनेकवचनमुपसर्जनार्थं न वैकविभक्तित्वादिति वार्त्तिकं कृतान्वर्थत्वान्तु क्तेस्त
द्वीत्याप्रयोजनवार्त्तिकेनैवेति तु तत्त्वं खण्डनं भाष्यशेलात्वेतदप्राप्तिरेचात्रेति बोध्यं अन्यथा चित्रगुरित्यस्य विग्रहे द्वयोरपि नियतविभक्तित
या किं न पक्षे गोशब्दस्य नियतविभक्तित्वं स्यात् एकस्यानियतविभक्तित्वे हि तत्पदेक्षमन्यस्य तत्त्वं वाच्यं समासे पेक्षे नियतविभक्ति
त्वमेव युक्तं माभूयितु मन्यथा सभार्य इत्यत्रोपसर्जनह्रस्वापत्तिः सहशब्दस्याव्ययत्वया विभक्तिमात्राभावेन लुकानुत्पत्तेरे
वान्वाख्याने न चानियतविभक्तित्वाभावात्तदपेक्षा नियतविभक्तित्वस्य भार्यायेत्यनाभावेनोपसर्जनत्वे नापत्तिः मम तु समासस्या
नियतविभक्तित्वात्तदपेक्षं तत्त्वं यस्यैवेति न दोष इत्याहुः गोस्त्रियोः अत्र स्त्रीप्राद्‌ः स्वर्यते तेन स्व्यधिकारोक्तचातुर्थिकप्रत्य
यलाभः उपसर्जनस्येति गोस्त्रियोर्विशेषणं प्रत्ययग्रहणपरिभाषया च स्त्रीशब्देन तदन्तग्रहणं तन्म्यां च प्रातिपदिकविशेष
णं तदन्तविधिरित्याह उपसर्जनं य इत्यादि गोकुलं राजकुमारीपुत्र इत्यादौ तु न दोषः महासंज्ञाकरणे नये न प्राक्देन समासविधौ

न्यप्यागणबोधनमिति ॥ उपक्रम्य वचनमेको गुणाऽऽपत्त्यमेको गुणाः इत्स भाष्योक्तेरन्यत्र पनं चैत्रापत्यमित्यादिन स्यादिति वदंति स्व
त्रै सुप्सुहिनेति भावेक्तः तेन क्रमीणां तत्तृप्तिरित्यादिवपि निषेध इत्युदाह तस्पृण्यादिति तृतीयेति तत्रकारणत्वेन भा॰ न षष्ठी समा
सस्संबंधत्वेनेति भावः ॥ श्रोत वै शेषमप्याह स्वरे विशेष इति तृतीयासमासेत्तृतीया कर्मणीति पूर्वपद प्रकृतिस्वरः स्यात् पाद्
स्वरापवादः षष्ठीसमासे त्वतादात्तः तत्पूर्णा नांसकत्वात् कर्मणीन्ति द्विजस्येति कुर्वन्निप्रत्यये तत्पाने कर्मणि षष्ठी न लो॰
केति निषेधात् नापि घटाघपेक्षात्यां सामर्थ्यात् समासानापत्तेः किंतु शेषेइत्या॰ह किंकरइत्यर्थ इति रक्षितइति अत
एव सर्वपश्यादिति भाष्यप्रयोगः संगच्छते प्रकृतसूत्रभाष्येपि अकृदव्यपेक्षत्वेरादिभिरसामर्थ्यं न समासभावमुक्त्वा
कृद्व्यपमेवोदाहृतं तेनान्यापेक्षे सति सामर्थ्ये समासइत्यर्थ इति गम्यते परेतु द्विजस्य कुर्वन् कत्वे त्वादोकारक षष्ठ्या
निषेधात् करणघपेक्षया शेषषष्ठ्यांल्लसमर्थ्यात्समासप्राप्तिरेवनेत्या॰ शंक्यः द्विजस्य द्विषन् पुरासूर्यस्योदेतोरित्यादे
द्विषः शतुर्वावचनं तोसुन्कसुनोरप्रतिषेध इति कारक षष्ठीसत्वात्तत्रोदाहृतं भाष्येतस्मात् शेषविषये कर्मणः शेषत्व
विवक्षायाः तादर्थ्यस्य संबंधविवक्षायां भावाएव पाणिनि निर्णायापेक्षभाष्यकृतः प्रकृतेरित्याऊः स्वकर्त्तव्यमिति कर्त्त च
क्त्या समासः तत्रकस्येति परिनिष्ठितविभक्त्या समासः अत्रत्वा समानाधिकरण समासं बाधित्वा षष्ठी समासः श्रा
न्नकटोपिकर्मणी ष्यादपोपीति पक्षेपि परस्य एन्वयएवेति नासमर्थ्यात् कृपान्व पनियमस्मानसाक्षादेव किंतु पद्धारकार

ततद्वारको ऽपीत्युक्तं अत एवैतन्निषेधस्य नानर्थकंतस्य हेतुत्वेन च समानाधिकरणामसमर्थत्वादिति समर्थ्ये समानाधिकरणा-
धिकारे समानमध्यमध्यमवीराश्चेति पाठेन तस्य समानाधिकरणाधिकारस्य सम[illegible]सा[illegible]विषयत्वेप्यत्र
त्राप्रवृत्तो मानाभावादिति वाच्यं अत्र व्याख्यानाभिहितमित्युक्त्या व्याख्यातृत्तरप्रत्ययेन कर्माभिधानयज्ञुषः पीयमानस्या-
स्यापर्थमावश्यकत्वात् स्पष्टं चेदं भाष्ये समर्थसूत्रभाष्योक्तेः प्रकरणांतरस्थेर सुसोरिति षष्ठेपि तत्प्रवृत्तिरित्या-
स्यत ननु षष्ठीसमासस्य निषेधेपि विशेषणसमासोत्र दुर्वार इति षेधे फलाभावोतत्आह विशेषणसमासस्त्विति
विशेषणं विशेष्येण सुपयोपादानेन तत्रावच्छेदकधर्मयोः परस्परं व्यभिचार एव विशेषणसमासवृत्तिरिति
नुनयुक्तं कैलाशादिरित्यादौ समासानापत्तेरत एवाभयोपादानं स्पष्टार्थमिति कैयटः इहतत्त्वकस्य सर्पिस्या-
स्यादौ तयोः समासयोरत्र फले विशेषाभावादिति भावः एवं प्रथमांतेन समास इति पक्षेपि षष्ठ्यंततत्प्रयोगा
भाव एवानभिधानं दिति वाच्यं एतत्त्वभाष्यतत्वस्य दाह तत्प्रयोगविषयमत एवान्यस्य पदस्यार्थे इत्यत्र षष्ठ्यंतको न्यपदा-
र्थे इति सूत्रप्रयोगः संगच्छते एवं च नीलोत्पलस्यगंध इत्यादि सार्थेव निषेधसामर्थ्यादिति तु नोक्तगमन-
स्यश्रयस इत्यादौ कर्मधारयेप्यजस्या च मकन्यायवत्प्राभावे कर्मधारये इत्यनेन पूर्वपदप्रकृति षष्ठीसमासे-
त्वेतोदात्तत्वमिति भेदेनतत्साफल्यात् फलांतरमप्याह गोधेर्मोरिति तत्राहि षष्ठीसमासे गुणप्रहः निविमि

स्वः अतः एव हत्वाहिः शेषइति सूत्रे किमर्थं हत्वामाहिहिरिति षष्ठीसमासइति भाष्य उक्तं गुणवचनेन निषेधात्तु नि
सइतितरपसूत्रे कैयटः ऊंमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इत्यादि गीतावाक्यादत्र कर्मधारय इतितरपसूत्रे
कैयटे लभ्यते राजदंतादित्वात्परनिपातः प्रतिपदेति ज्ञोविदर्थस्य करणे इत्यादिकेनोर्थ्य इत्यत सूत्रविहिता प्रतिपदविधा
नपि नतेषु शेषपदसंबंधेन शेष एव ते षष्ठीवि धानेन तत्र षष्ठी शेष इत्यनेनैव सिद्धौ तत्सामर्थ्यात्समासाभावः
कल्प्यते तेन प्रतिपदविधानेति नापूर्वमिति तत्र तत्त्वज्ञातु योग ड पात्तकारकातिरिक्तकारकाणां शेषत्वविवक्षाभावज्ञाप
नेनाविचारितार्थ्यासंभवात् किंच कृत्वोर्थप्रयोगे ज्ञोविदर्थस्य दिवस्तदर्थस्य स्यादि विषये समासनिषे नाप
त्तेः तत्र शेषग्रहणनिवृत्तिः सर्वसंमतत्वात् कृत्वोर्थेत्यत्र संबंधे भाष्यानुग्रहाभावात् एवं ज्ञोविदर्थस्येति सूत्रे पितासं
बंधेनात्यंतभाष्यानुग्रहः अधीगर्थ त्यादौ मड्डूकानुवृत्तिः एतच्चादिवइति सूत्रे विस्तरेणोपपादितं तथा तस्मादविते त्या
दौ तन्योगे कर्तृकर्मणोरित्यस्य निषेधेनानेनैव षष्ठ्याः समासनिषेधस्य भगवतइष्टत्वात् अतएव भाष्येनेदं प्रत्या
ख्यातं अतएव प्रतिपदविधानकतिप्रश्नेसर्वा प्रतिपदविधानाशेषलक्षणां वर्जयित्वा कर्तृकर्मणोः कृतीति च कृद्यो
गेति भाष्ये उक्तं तत्र शेषलक्षणामित्यस्य शेषमात्रलक्षणामित्यर्थः प्रतिपदविधाने त्वस्य कारकविशेषोपादे
नेन विहितेत्यर्थः तेन तुल्यार्थैरित्यादेर्नैतन्मिसलं पूरणगुणेति अदिनागुणसहितो अत्र
रपूरणार्थत्वेन पूरणत्वाच्चेति पादनिरस्यं न तस्यापि ग्रहणं व्याख्यानात् गुणार्थ शब्देन केवलगुणवाचीसन

२८।

गुणोपसर्जनद्रव्यवाचीगुणबोधकप्रकृतिकभावप्रत्ययांतस्यव्यग्रहितेषांव्याख्यानात्तदाह काकस्येति आकारस्तूक्तोक्तगुणव
चनांतु नेह ग्रहणं वचनपदानुपादानात् तदेवमिति अन्यपाश्वीलक्षणस्यपेदंतादृत्स्य प्रयुक्तपदेनासामर्थ्यात्समासप्राप्तौरू
वनेति भावः इदानींतु शुक्लःपटइव विशेष्यसमर्पकइत्युताशयं परंतुएवमपि समर्थ्यंद्रुतपपादिषष्ठ्यंतसमर्पप्रकृतिके
न सर्वं तेन समस्यतइत्यर्थात् अत्र हि सुवतेन शुक्लादितिपदेनवाकैकदेशमायेन शुक्लादितादृत्स्यर्थबोधः एवंचसबुत्स
त्तिः शुक्लेपटाद्यव्याप्येएवेति न समर्थप्रकृतिकतास्वतस्य भूतएव श्रीलक्षणस्यर्गे भंगतद्रूपर्थकेश्रीलक्षणस्य गतइति वा
कये प्रकरणादिनागत्यमेतस्यर्थस्योक्तन्यायेनगतइत्सनेनोक्तौ समासो न नेष्यते च तत्र समास इति कर्मणी चेति सूत्रे
भाष्यकैयटयोः स्पष्टमाकार्षादपरावाच्योदाहरणं गुणेपरतापि शुक्लादीनां विशेष्यद्योपादाने प्रकरणादिनातद्व
गतौ वानान्यत्राभिधानस्वाभाव्यात् अनित्योयंगुणेनेतिप्रथमं [illegible] र्थे नेति च वोध्यः इत्यादीति लोपे चेत्या
दिप्रयोगमित्या विशक्रार्यः तेन कुंभपूरणं भवउछषष्ठइत्यादिसिद्धं परेतु एषकुंभसंबंधिपूरणं संख्या संबंधी षष्ठ इति
मध्यमपदलोपीसमासोतएव भाष्येनि सलं नोक्तमन्यत्रास्यानभिधानमतएव सर्वश्वेत इत्यादौ गुणेनेनेति निषेधा
त्के पंसमासइत्याशंक्य गुणांतरेण समाससत्वलोपश्चातिवचनमार आसर्व गुणेति सूत्रे भाष्ये तत्व्याख्याद्वास्तु भावश
ब्दइति प्रोजनशतं गोविंशतिरित्यादौ च नायंनिषेधः तथा च पंक्तिविंशतीति सूत्रे भाष्यमतएव विंशत्यादयसमुदाये
संतोर्थविवचनाभवंतीति विंशत्यादिषु भाववचनेष्वितिवपस्तु तत्रे षां गुणवचनत्वव्यवहारोपि स तु तत्साइत्यात्म

मानयप्रक्रालनायेतते इत्युक्ते अत्र नपुंसके तुल्यास्यत्रेनो वक्तव्य इति स्पष्टमेवोक्तं वार्तिककृता सिद्धांतिनाऽपवादत्वम
ज्ञानतराकदेशिनोमतेन दित्यादिकृत्क्रियेद्विगर्भवाक्ये पूर्वपक्षत्वस्यैवोचितत्वात् भाष्यकृतानुफलत्वान्नोत्तरग्रकं
सिद्धांतीतु किमुच्यते नपुंसके कवचनइति सर्वत्रणनेदव वक्तव्य इत्येवंशब्देः प्रत्याख्यातं कुर्यात् अनयोरव्यादेशयो
रेतदद्यतसोरित्येतत्सादृचर्येणोपसर्जनेनप्रवृत्तिः त्यदाद्यत्वेन सिद्धमिति भाष्यासंगतेरत्र एतेनत्तमादायैनादेशः
प्रत्याख्यानपरं यद्येनतत्क्रियतेइत्यादि भाष्यं त्वेकदेश्युक्तिरिति भाष्यप्रदीपोद्योते निरूपितं अन्वादेशविषयइदमेत
देः समासस्यानभिधानमेवयद्येनतत्क्रियतेएनोनवक्तव्यः कथमेनमित्यादिस्त्यदाद्यत्वेन सिद्धं यद्येवमेतच्छ्रितकाल
सिद्धतिए ततच्छ्रितक इतिप्राप्नोति यष्यालक्षणमप्रयुक्तेइति भाष्यात् ब्रह्मणीति न संयोगादिति तिषेधाद्लोपो
न रोः सुप्यहभीतीतिअहल्लितित्वेहोभातीति स्यादिति भावः नलोपेप्राप्तइति नचलोपेकारस्यरो रेवाधिःशेषाभा
वेनदीर्घीहो निराद्येत्यादावुत्वसंपादनेन चचारितार्थ्यात् नचनकारोच्चारणसामर्थ्यलब्धेननकारान्ताउकरणेननं
तस्याहन्नप्रशादस्येति व्याख्यानाल्लोपोनेतिवाच्यं संबुद्धौन लोपप्रतिषेधेनाहर्गरुत्यादौ भुत्वाभावेन्दीर्घहेति
दाद्येत्यादौ संबुद्धौ प्रवृत्त्याभ्यामादौ व्याप्तत्वाच्च नकारस्य चारितार्थ्यात्तेनन लोपबाधेमानाभावादिति भावः आवर्त्त
ति आवृत्तोमानं चरू पराक्री निवार्तिकमेवान्यथान लोपेकारस्य रफादेशो नैव सिद्धेतोदेयर्थ्यस्पष्टमेव भाष्यप्रामाण्याच्च

तस्यासंबुद्धावप्रवृत्तिः तत्र ज्ञापकसिद्धवचनकल्पनापेक्षया आवृत्तिर्नेदीयसीति भावः आवृत्तस्य पदान्ते हलिति निपात्यन इत्य
र्थः इदमसंभव एवापवादत्वमिति वार्त्तिकमते हलिति सस्य नलोपानन्तरं चारितार्थ्याभिमानेन वस्तुतः सत्यपि संभवे बाध
नं भवतीति भाष्यसिद्धान्तात् रुत्वरत्वे नलोपापवादभूते एव निषेधविषये पिप्राप्तिमात्रेण येन नाप्राप्तिन्याय विषयत्वात्
निषेधेनापि तस्य बाध इत्यन्यत् एतेन संबुद्धौ चारितार्थ्यमित्यपास्तं ध्वनितं चेदमपवादारूने लोपं बाधिष्यत इत्यर्थ
कभाष्येण एतदर्थेन लोपे कृते कारे सावकाशत्वशंकान्तसमाधानादि वार्त्तिकानुसारिणो रित्यलम् तदंतस्यापीति पदा
धिकारस्य त्वात् ग्रहणवत्ते ति निषेधस्तु प्रत्ययविधिविषय इत्यसमासे निष्कादिभ्य इति सूत्रे भाष्य कैयटयोः स्पष्ट
मितिभावः तस्यासिद्धत्वादिति अकृतव्यूहपरिभाषया दीर्घाप्रवृत्तिः स्यादित्यभिमाने नेदं दीर्घस्तु परत्वाद्धलङ्याब्भ्यादि
लोपात्पूर्वमेव बोध्यः संबुद्धौ त्विति सुपोत्र हल्ङ्याब्भ्यादिलोपाद संबुद्धा विस्तुक्तं दीर्घाभावरुत्वे हपि चेत्युत्वे अष्टगुणः
स्याग्विणीति इन् ग्रहणे नार्थकस्यापि ग्रहणाद्दीर्घ इति भावः वहुवृत्रहाणीति अत्र पदत्तरूपे तदुक्तं पदान्ते कुत्वमि
ति किं स्वत्मय स्यास्यासि द्धत्वाद्ध्रुव इति यत्वे कुत्वमित्यर्थः यत्वं तु स्पष्ट मित्यादौ सावकाशमिति भावः भाष्यप्र
योगादिति अनेन भाष्यप्रयोगेण नम पूर्वपदे कुत्वाभावो बोध्यते तेनास गित्यत्र न दोषः कुत्वापवाद इति र

विवप्रतिपन्नवाचित्वात्तिरस्कार इति भाव तन्नानादर इति मन्यकर्मविशेषणं तद्योतकं पदं कर्मेत्यर्थः नेन युस्मच्छब्दाच्च
तुर्थीन तिरस्कारस्य अव्याख्यानात् स्वपक्षचिह्नं निरूपितोपमेयत्वस्याप्यभावरूपमेवात्र गम्यते न त्वपकृष्टसादृश्य
रूपः न त्वा तृणमिति श्वन न स्वसमभिव्याहारएव तृणं तुल्यमपि न मन्य इत्यर्थः तृणाय मत्वा रघुनंदनो पीत्यादौ तत्रो .
ध्याहारस्तत्राह न त्वां तृणमिति कर्मीत्र चतुर्थ्यन्तर्यः श्वनेति न नु यका आख्यानादिति भावः श्वन्नुपलक्षणं तेन
लिङ्गादावपि भवति तदध्वनयन्नाह नानादिक योगे नेति नौकाकेति भाष्ये यद्यप्राणिष्विने ध्यनेनैतावा इत्योभ
विष्यं नीति याख्यातिवहुवचनेन नह्यमुदाहरणएव लेन चेछिनिर्णयः इति भावः गत्यर्थकर्मकर्मीत्रापि चतुर्थ्यर्थे:
गत्यर्थेति किं ओदनं पचति कर्मणीति किं अश्वेन गच्छति चेष्टायां किमिति धात्वर्थस्य क्रियारूपत्वात्सम्भः
शरीरक्रियायाएव ग्रहणमिसुनरं पंथानमिति अध्वशब्दो मर्गपरोमाख्यानादिति भावः अधिष्ठिनइति
शब्दप्रयोगसमकालिकं गंतृव्यापारजन्य फलाश्रय इत्यर्थः अध्वपदेन गंतव्याध्याऽपि उच्यते गंतृ युक्तस्थि
यां स्त्रियं गच्छतीत्यादो न स्यष्टं चेद भाष्ये उत्पथादिति उमयसंत्यजेत्यर्थः इष्यत इति नत्वाक्रां न इत्यर्थः
उत्पथेति गंतुमशक्त इति शेषः इति चतुर्थी ध्रुवमपायो विभागजनको व्यापारस्तद्वताश्रयेद तियावत् विभा
गस्त्वनवास्तवसंबंधपूर्वको वास्तवएव किंतु बुद्धिपरिकल्पितसंबंधपूर्वकोऽधिक ल्पितोपि माथुराः पाटलि

पुत्रकेभ्य आ अनंतरा इत्यादेस्तु विपरिक्रास्मितापायाप्रपत्तेनैव भाष्येपंचमीसाधनानि कर्त्तवारणाय ध्रुवमिति अन्य
थाकर्मसंज्ञायामियमपवादः स्यात् अपायविषये यत्र कारके तद्रूपक्रियाजनकं तदपादानमिति सर्वसंभवात्तक
र्तृसंज्ञानुपचरणादि योगे चरितार्थो हरिरप्याह अपाये यदुदासीनं चलं वा यदि वाचलं ध्रुवमेव तदावेशात्तद
पादानमिति स्पष्टं चेदं कैयटादौ भाष्यानुसारिणस्तु एवं हि अश्वात्पतितो धावतः पतित इत्यादौ ध्रुवत्वा
भावादपादानत्वं न स्यादिति … संज्ञा प्रोक्तस्याविवक्षितत्वमत्र प्रयत्नः सतोप्यविवक्षा भवतीति समादि तं भाष्येतदसंगतमसा
ते स्वइत्तो ध्रुवत्वस्य यत्र चालत्वस्यापादाप्रपत्स्या ज्ञासत्वे न सतो प्रोक्तस्याविवक्षेत्यस्यासंगतेः सिद्धांतेपि तु
उक्तं भाव पदार्थे केवलमेवोचितमिति तदुसंगते अत्र लोकसिद्धातिरिक्तं यद्ध्रुवमवधिपदस्य प्राप्तिकल्पने गौ
रवं च अनेन दावे प्राद्दि तस्य हरिकारिकायां तदावेप्राविवक्षणादि सर्वेः तस्मादपाये जातिविशेषे सति यत्र ध्रु
वमवधिभावोपगमाप्रपत्त्वे सति तदातिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति सूत्रा
र्थः ग्रामादेरवधित्वोपयोगिव्याप्रयतेन प्रांकावरुद्धत्वात्तसीमित्यादौ तस्मात्सत्वात्तदुपयोगित्वं तस्य ग्रह
ने विद्यमानस्याप्यविवक्षितत्वान्न तदुपयोगित्वं तस्य तत्र ध्रुवमपाये इति तु तस्य पर्णपततीत्यादौ व

त्रुसकृते: सस्यय: ह्रस्व स्मुन प्रत्ययइत्युक्तं वस्तुत: उच्चारणार्थ नामपीत्सं ज्ञावश्यकत्वादियमुक्तिनि ष्फला पुमान्तितिसांतेति
दीर्घ: उशनेतिवशे: कनसिग्रहिज्येतिसंप्रसारणं अस्यसंबुद्धा विति एतच्चवृत्तौवाचनिकं पठितं वशधातोर्माधवस्तुसंबो
धनेत्वुशनसाविरूपं सांतंतथानांतमप्याप्यदंतमिति श्लोकवार्तिकमित्याह भाष्यात्तत्त्वादिदमप्रमाणमेवेति प्रामाणि
का: उशना: अकु: अनेहा: काल: नजिहनएतचेत्यसुन् हनएहादेशश्च सुवइति अधातोरित्यस्य धात्ववयव यव मिन्नोसं
तस्येत्यर्थ:इतिभाव: अन्यथासमुदायस्य धातुभिन्नत्वा दीर्घ:स्यादेवेतिबोध्यं अदसऔ अदसइतिषष्ठी तदो: सइत्यत: सु
विति वर्तते औत्वं त्यदाद्यत्वापवाद: ननुसौ उ दौ इत्येवास्तु इतिचेन्न असौ इत्यत्र टिलोपेकृते नित्यत्वात्सत्वं बाधित्वा त्यद
द्यत्वे सावित्यसिद्धे: असुक इति अमुक इत्यादौ त्वमुत्यन्नोद: शब्दपर्यायो मुकशब्द इत्याहु: एतदेत बहुवचनपाकेयोगि
कइत्याह वक्रीयति नामीतिसिद्धं पश्चाद्भवेति उत्वेत्युपलक्षणं मीत्वस्यापीति ननुत्वस्यासिद्धत्वात्कथं नाभावइत्यत
आह नमुनेति कर्तव्ये कृते चेति एवंच नइति विषयसप्तमीतिभाव: भाष्येतु नेयत्कार्यं तत्रासिद्धत्वं नेत्यर्थ नैव नाभावो
प्याह्रितइतिव्याख्यातं मुइति समाहारद्वंद्व: कृते च सुब्बित्वेसुपि चेति दीर्घो न अमीभिरिति नेदमदसोरित्यैसन
इतिहलंता: पुल्लिंगा: नहोध: झलोझलीत्यतोझलीति पदस्येति स्कोरित्यतोन्तइति चानुवर्तते झलिपरपदांते वि

भाष्येस्पष्टं विदुष इति संप्रसारणपूर्वत्वस्य यत्वनुकोरित्यसिद्धत्वेन न पदांतपदाद्योरेकादेशस्यैव तेनासिद्धत्वात् सेदिवानिति
वद धातोः भाषासदेतिलिटः क्वसौ द्वित्वे तराकेत्यत्वाभ्यासलोपयोर्वस्वेकाजादितीट् अकृतेति परेत्तुपदावधिकेन्वाख्या
ख्याने सेद्रुस आसितिस्थिते इट् संप्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात्पूर्वं संप्रसारणे वत्लादित्वा
भावादिटः प्राप्तिरेव नेति सेदुष इत्यादिसिद्धिरिकृतव्यूह परिभाषा निष्फला लक्ष्यानुरोधाद्वपदावधिकमेवान्वाख्या
तमित्याहुः साहचर्यादिति न च महत्यतेः क्विपि महतोपि धातुत्वसंभव इति वाच्यं औपदेशिकधातुत्वासंभवेन तत्साहच
र्येणौपदेशिकधातुभिन्नसांतसंयोगस्यग्रहणमित्याशयात् सुहिनिति नांतलक्षणदीर्घस्तुसंयोगांतलोपस्यासि
त्वान्न हि सीत्यस्यादित्वाददनिदितामिति लोपो न ध्वदिति स्रंसु ध्वंसु अवस्रंसने क्विपूत्र अनिदित्वान्नलोपः वास्वि ति
दत्वं विवक्षितम् इति भाष्ये अस्तु अपदेशिवद्वचनं स्वरसिध्यर्थं वहिरंगलक्षणत्वादिसुक्तत्वादिति भावः पूजन इति पते
रिति पाठांतरं क्विपामिनिसूत्रे वस्तुतो वचनमेव न्यायः विवक्षितसप्तम्यामपि विभक्तिवृद्धिनिमित्तकत्वेन वहिरंग
त्वाज्जनः पूर्वं परमपुमानित्यादौ स्वरप्रवृत्तौ दोषात् वडुपुंसीति विभक्तौ लिंगविशिष्टाग्रहणात्वासुङ् विभक्ति
विवक्षायां लिंगकार्यांतरमेव सत्वेन ङीपः प्रागसुङिति भावः पूजन इति पातेरिति पाठांतरं क्विपामिति सूत्रे भाष्ये

वहुराजेति डाबन्तार्थमापग्रहणमिति भाष्ये उक्तं संगच्छते तस्माद्वाचेत्यसाध्वेवेति शिवं इत्समयानि ॥ स्त्रियां अचेतनस्वद्दा
देहादिसाधारणं लिंगं तु सत्वादीनां गुणानामुपचयापचयास्थितिरूपं क्रमेणपुंस्त्रीनपुंसकाख्यमेकार्थे शब्दान्यत्वाद्दृष्टं लिंग ॥
त्यत्व इति भाष्योक्तेरर्थनिष्ठं केवलान्वयि इयं व्यक्तिरिदं वस्त्वयं पदार्थ इति त्रिविधव्यवहारस्य पदार्थमात्रे सत्वात्केनचिल्लिंगत्रय
विशिष्टमिति लिंगानुशासनादिना निर्णेयं तत्र स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः इत्यादि लौकिकलिंगासंभवे शा
स्त्रीयकार्यं शास्त्रीये उक्तरीत्या तत्संभवेत् शास्त्रीयविशिष्टे लौकिके शास्त्रीयमपि शब्दतो बुध्यते तथानुभवात् उपचयापचययोः
तेरपि सत्वेन तन्मात्रविवक्षायां सामान्ये नपुंसकमिति प्रवाद इत्यन्यत्र विस्तरः अत इति वर्णग्रहणान्न दंतविधिस्तदाह कारान्तस्य
चेति यत्स्त्रीत्वमिति तद्वाच्यार्थगतं यत्तद्वाच्यं स्त्रीत्वमित्यर्थः एवमाख्यानेफलमग्रे स्फुटं तत्र द्योत्ये प्रत्ययार्थत्वे हि तस्य विशेष्य
त्वापत्तिः द्योत्यस्य तु विशेषणत्वमेवेति स्पष्टमाकरे वाजादिषु विनापि टावादिकं तस्य बोधाच्च अत एव व्याघ्रक्रोशीत्यादौ क
र्मव्यतिहारे णच स्त्रियामिति णिच् णचः स्त्रियामित्यजि चड्ङी प्रसिद्धिः अतिलूनीत इत्यादौ द्विर्वचनं सुवर्चं भवतीति न्यायेन सम
स्तेयस्य दुष्टत्वात् टाप्स्यादिति स चाधिकारात्प्रातिपदिकादेव तच्च सान्निधानादजादिरूपमेव न त्वजादिष्वकारान्त
पाठोऽनर्थकः ॥ तदन्तविधिसिद्धेरतश्चाहाजाद्युक्तिरिति येन नाप्राप्तिन्यायादिति भावः एतेनापि कृते लिंगविशिष्टपरिभाष्य

याटाप्चरितार्थ इत्यपास्तं न नुप्रत्ययविधौ पंचम्या एकत्वेनाजादिभ्यष्टाप् स्त्रीत्वे द्योत्ये इत्यर्थ एवमुक्तः स्त्रीत्वं च प्रसत्यासत्या
प्रकृत्यर्थनिष्ठमेवेत्यत आह अजादिभिरिति व्याख्याने तत्परिष्कृतमिति भावः अप्रत्यत्र नञ्स्त्रियामिति तदंतस्यापि विशेषणं व्या
ख्यानादेव एवं च पंचमुत्वानीयस्यां सा पंचमूल्वरी स्येव पंचाजीति पंचानाम् अजानां समाहार इति द्विगावकारांतोत्तरपद इति
स्त्रीत्वे द्विगोरिति ङीप् अजादिभ्य इति व्याख्याने ऽमहत्पूर्वग्रहणेनानुपसर्जनाधिकारेण च नोरचेत्यत्र वात्रापि तदंतविधिसं
भवः न च तदंतविधावपि स्त्रियामित्यजादीनामेव विशेषणमिति वाच्यम् अनुपसर्जनाधिकारेण तदंतग्रहणस्येव स्त्रियामि
त्यस्य तदंतविशेषणत्वमित्यर्थस्यापि बोधनात् अत्र हीति समासे ऽज शब्दसत्वे पि समाहारनिष्ठं स्त्रीत्वं समुदायवाच्यं नाज
शब्दमात्रवाच्यं सामर्थ्येनाजादिमात्रवाच्यस्त्रीत्वस्येव ग्रहादिति भावः च[illegible] इति त्रिपकादित्वादित्वं न कुस्त्र इति असंज्ञापकं
भस्त्राफलेस्येव संभस्त्रेति सदजिनेति मूलान्नञ् इति च पाककर्णेति प्राप्तस्य ङीषो बाधनार्थ एवं च श्वेतनफलात्रिफलेष्वत्र बोध्य
मूद्राचेति जातिलक्षणङीषोपवादः जातिश्चेद्वाच्येत्यर्थः पंचमूद्रीति समाहारे जातिवाचकत्वाभावात् मूद्रशब्दार्थगत
स्त्रीत्वाभावाच्च न दोषः जातिश्चेदित्यस्य कृत्यमाह प्रयोगे त्विति न चात्र गौणत्वं सहचरालाक्षणिकत्वस्येव गौणत्वात् गौ
णमुख्यन्यायस्य पदकार्यविषयत्वाच्चेति भावः अमहत्पूर्वं त्यत्रापि जातिश्चेदिति संबध्यते महत्पूर्वनिरासं लभन्ते जातिश्चे

मितिभूर्मेतस्य नियमत्वानुपपत्तेरितिस्पष्टं चैव द्रष्टव्यमिति सूत्रे भाष्यादिषु द्योतकविषये पुनरर्थानामितिन्यायोऽधिपरीतिसूत्रे भा
ष्येदर्शितं तत्र ह्यध्यागच्छतीत्यादावगच्छतीत्यनेनानधिकार्थयोरध्यिपर्योः प्रयोगस्योक्तार्थानामितिन्यायेनाभावमाशं
क्यापूर्वयोद्वावितस्यादस्तुक्तार्थानामप्रयोग इत्यदर्शनेन समाधानं कृतं तत्र हि द्विशब्दरूपशब्दयोर्वाचकयोः प्रकृतिप्रत्ययो
र्वाचकद्योतकयोर्द्वावित्यत्र तयोर्वाचकत्वेवादकयोश्च समुच्चयः अत एव द्विरशादित्यादौ समासेन सुजर्थस्योक्त
त्वान्न सुजितिभाष्य उक्तं तत्र हि समासः सुज्चेत्युभयमपि द्योतकं सुजर्थश्च जन्मेति तत्रैव वक्ष्यते तथा तद्धितद्विर्वच
नयोर्द्योतकयोस्तद्धितेनोक्तत्वाद्वीप्सायां न द्विर्वचनं माषराद्स्यादादिति सर्वस्य द्वे इति सूत्रभाष्य उक्तं एवं च धा
तोरपि क्रियाकालकारकसंख्यारूपपंचकमर्थः अत एव तद्विषयेपि द्विकयोरित्यादेर्भावकर्मणोरित्यादेश्चानित्य
मत्वं भाष्यसंमतं संगच्छते अत एव दधि अजमर्था अवेदित्यादौ प्रातिपदिकधातुभ्यामेव सर्वबोधः अत एव भावक
र्मणोरित्यस्य तद्धतानाश्रुतो रित्यर्थः स्युक्तमोरितिसूत्रे भाष्ये दर्शितः द्योत्यत्वादेवोभयत्रापि प्रत्ययार्थस्य विशेषणात्व
मेवेत्यन्यत्र विस्तरः प्रथमेवेति साहि प्रातिपदिकार्थस्य नेनोक्तत्वेपि भवत्येवेति भावः अत एवाभिहिते प्रथमेति वार्त्ति
के संगच्छते तिङ्कृदित्यादि परिगणनादेव कटं भीष्मं कुर्वित्यादौ विशेष्यादुत्पन्नद्वितीययागतार्थत्वेपि विशेषणात्त

कर्मत्वमुक्तं तावदिति अधिशीङ्स्थासामिति सूत्रात् आधारेति कर्तृकर्मद्वारा क्रियाश्रयो हि सः तदुक्तं गेहमित्यादिस्थ
तु क्तेकर्मपदेनेत स्यास्यबोधितकर्मसंज्ञकं कर्मत्वशक्तिमत् सतेसर्वकर्मविहितद्वितीयादीनां कर्मत्वशक्तिमात
र्थः क्रियाकारकभावसंबंधश्चार्थः राज्ञः पुरुष इत्यत्र राजपुरुषयोः संबंधस्य षष्ठीवाचकाकार्थं स्थितइति
क्रियाकारकयोः संबंधस्य द्वितीयावाचिका इतिसमर्थसूत्रभाष्यात् एवंच हरिं भजतीत्यादौ हरिकर्मकं भजनमि
तिबोधः अभिहितेत्विति अनभिहिताधिकारादिति भावः पंचकप्रातिपदिकार्थपक्षे कर्मणि द्वितीयेत्यादेरेकयोरि
त्यादिरनियमत्वमेतदभावेपि स्वादिसूत्रेणानिर्दिष्टाः प्रत्ययाः स्वार्थइति कर्मादेः संख्यायांच स्वादीनां सिद्धेः त
त्र पदाकर्मणीत्यादेः द्येकयोरित्यादेश्चैकवाक्यता यामेकस्मिन्कर्मणि इत्यन्वयेन सूत्रजबोधकर्मार्थस्याधा
त्वं तदानार्थीनेत सूत्रजबोध विषयप्रधानविषयेणोऽकार्यानामिति न्यायेन सिद्धेः यद्यपि द्विवैकंभुवद्धमिति न्या
ये न द्वौ ब्राह्मणौ मतिलनीतद् त्यादौ द्योतकवाचकयोर्द्योतकयोरसमुच्चयो पादद्वयस्तथापि प्रकृते लस्यान्तद्वारा
उकार्या नामितिन्यायानुसरणस्यैव वक्तुं शक्यत्वात् एवंच कर्मादीनां द्योत्यत्वमेव यदातु कर्मगतएकत्वे इत्यन्व
येन संख्यायास्तत्वं तदा सूत्रमारभ्यं भाष्येण विभक्त्यर्थत्वव्यवहारो द्योत्यत्वे व तत्वे तावत्तानत्वस्य त्वमेवा

चेति उत्तरशब्देनोत्तरपदं लक्ष्यते उत्तरपदशब्दश्च समासचरमावयवे रूढः तेन तस्य पदत्वेन प्रयुक्तकार्यकर्तव्ये ऽनुमतानुत्तर
प्रत्ययलक्षणेन पदादिविधौ तत्त्वयं निषेधो नेत्यर्थः तेन परमवाचे साक्षे न कुत्वं दधिसेचाविच्छादौ सात्पदाद्योरिति षत्वनिषेध
श्च निरूपपदादेव विच्छिषष्ठीसमासोत्र सोपपदात्क्विबोऽनभिधानमिति कैयटः सेच यतः क्विवित्यन्यपदादिविधिश्च प्रतिपदोक्त
सात्पदाद्योरित्येव तेन परमगुधावित्यादौ भष्भावो न उत्तरपदादिः कर्णो वर्णलक्षणादित्यादौ तूत्तरपदशब्दस्य समासचर
मावयवमात्रे रूढेर्न दोषः अयं च निषेध उत्तरपदस्य कार्यित्व एवेति ङमुट्सूत्रे उक्तं बहुच्पूर्वके बहुवाचौ बहुसेचावि
त्यादावपि न दोषः बहुच्पूर्वस्य च पदादिविधावेव प्रत्ययलक्षणमिति वचनान्तरात् पूर्ववार्त्तिकमपि उत्तरपदत्वे चापदा
दिविधावित्येवमेव पठितं शतनस्य प्रत्याख्यानप्रकारस्तु गुरुतर इति भाष्ये ध्वनितं प्रत्याख्यानानन्तरं पुनर्नञ्घटितेन तद्वचन
पाठेनेति न सालिखितः उत्तरपदशब्देन मध्यमपदत्वानाक्रान्तोत्तरपदस्य ग्रहणं व्याख्यानात् तेन पूर्वं दं डिप्रियद्रता
दावग्रोत्तरतत्पुरुषोत्तरपदे न लोपादिसिद्धिः कादेशो नेति इदम्शब्दे यः साविति चेसौ नेत्यपि बोध्यं वक्तव्य इति क्विती
यादौ दृश्विति अग्रं संबध्य तेन अयं पञ्चसामर्थ्यात् तुकालेऽपि भवति एनादेशोऽपि एनमित्यादि सिध्यर्थं वक्तव्यः येन ना
तिश्च स्वरितत्वादिति भावः इति शब्द इति एवं च भाषायामिति व्यर्थं छन्दसीत्यस्यादिकु पूर्वपदात् इत्यत्रासंबंधेनास्व
रितत्वादसंबंधसिद्धेः परेणद्विगिति सूत्रे वाह इत्यत्र च छन्दसीति वर्त्तते लोके त्वंतोदात्तमेव प्राक्सुखीति एवं चन्तलि
वृत्ति वोधनाय भाषाग्रहणं इति ध्वार्थं तेन छन्दस्यपि अनृतएवं ङरामिति सूत्रेकेयष्ठ सख्या शिश्वीति भाषायामि
तिपाठादस्य तेरत्राडुः क्वचिदिति सर्वविधीनां छन्दसि वैकल्पिकत्वेन सख्यासप्तपदीभवतीति सिद्धं न विद्यते शि
श्चुरस्याइत्यशिश्वी क्वचिदस्याद्युदात्तत्वं तु छान्दसत्वात् जातिशब्देन अर्थैकार्यासंभवात्तद्वाचकग्रहणमित्या
ह जातिवाचीति अनत्यभावे विषयशब्द इत्याह न च स्त्रियां नियतमिति भिन्नेष्वभिन्नाभिधानप्रत्ययनिमि
त्तं जातिर्नित्यमेकमनेकानुगतं सामान्यमित्यस्य चक्षुरादिगुणस्यैकत्वनित्यत्वपक्षे तत्रातिव्याप्तिर्न न ते
न प्राप्तते सा जातिरितिच एवं स्याद्वाव्याप्तमत आह आकृतीति ग्रहणमितिकरणे ल्युट् सामान्येन पुंसकं ख्या
कृतिरवयवसन्निवेशः आकृतिर्ग्रहणं यस्या इति विग्रहः स्तन इहात्रानुगतेति इदृश्याकारो गोरित्याकृत्युपदेश्या

बहुनञ्जादीनां म स्वांगत्वेन विकल्पस्य न त्स्यर्वंकेदुर्वारत्वात् तदाह नित्ये प्राप्ते इति वक्ष्यमाणत्वेति बहुव्रीहित्वात्सर्वपदद्वयकृ
तस्वरे शेषनिघाते चानुदात्ततायं पुत्रादिनीत्यादेस्तु प्रजातावितिनिदर्शने नाकृतिग्रहणत्वाद्यभावेन च पुत्रशब्दस्यजा
तिवचनत्वाभावेपि पुत्रहतीत्यादेर्गौरादिङीषिति बोध्यं अस्वांगपूर्वादित्येव सिद्धे पूर्वपदग्रहणं स्पष्टार्थं किंचैतदभा
वे स्वांगादिति प्राधान्याद्बहुव्रीहिविशेषणं स्यादिति स्वांगाच्चोपसर्जनादित्युपसर्जनग्रहणाल्लब्धे बहुव्रीहिरित्यनुवर्त
माने उपसर्जनग्रहणफलमाहातिकेशीति एकविभक्तीति केशानामुपसर्जनत्वमप्रधानत्वं च शिखेति इदमेव प्रत्यु
दाहरणं शोभनेत्यादिसु शिखांतप्रादिषु विशिष्टदेतत्वाभावे नाप्राप्तेः यदपि भाष्ये प्रिशिखेति प्रत्युदाहृतं तच्चाप्येकदे
शएवतात्पर्यं न पूर्वसहनञ्ज्जितिनिषेधेन प्राप्त्यभावात् एतेन क्रोडादिषु शिखाशब्दपाठ इत्यपास्तं ननु स्वमं
गे स्वांगं चेत्सुमुखा शालेत्यत्रापि स्यात् मुखस्य शालांगत्वात् सुकेशी रथ्येत्यत्र च न स्यात् केशानां तदंगत्वाभावात्
तत्राह द्रवमिति स्पर्शवद्द्रव्यपरिमाणं मूर्तिः रथ्येति इहानीं प्राणिस्थत्वाभावात्पूर्वलक्षणे नास्ति क्षतिः एवं चैतत्पू
र्वलक्षणे प्राणिस्थत्वमुपलक्षणमित्यत्र तात्पर्यग्राहकमिति भावः प्रतिमादिगतस्तनस्य प्राणिनि कदाप्यदृष्टत्वा
दाहतेन चेदिति अप्राणिनोपि स्वांगं यदि तेन तज्जातीयेन वस्तुना प्राणिस्थस्यासंबद्धत्वात्ऽप्राणिसंबद्धमेदित्य
र्थः अत एव तस्य चेतत्याशुतनमित्यस्याप्राणिनोपि स्वांगमिति शेषे भाष्ये दर्शितः सुरत्वादिति सहनञ्तरस्येव

करणे किंसु क्रीता धनक्रीतेति कर्तृकरणे इत्यत्र बहुलग्रहणे न गतिकारकोपपदानां मित्यस्यानित्यत्वादत्र सुबुत्पत्त्यनं
तरमेव समास इति भावः इदमुपपदमिति सूत्रे कैयटस्य पक्षं अपमजादिभिस्त्वन्ये गतिरित्यादेरनित्यत्वे न मानमिति तदा
शयः अन्तराच्चेत कर्तृकरणे इति सूत्रे बहुलग्रहणफलत्वेन भाष्ये मोक्तं अंवांवेति सूत्रे गवादिग्रहणं तु नियमार्थं ते
न हृदिस्य इत्यादेः षत्वं नेति दिक् अभ्रलिहीति क्रूरहणे गतिकारकपूर्वस्यापीति विशिष्टस्य क्तांतत्वं अस्त्यास्यापा
मिति समुदायोपाधिः अल्पत्वे करणगतं क्रियागतं वा क्तांतादिति क्तांतान्तादित्यर्थः ग्रस्यपग्रहणपरिभाषालब्धक्तांते
न प्रातिपदिकस्य विशेषणात् उरुभिन्नीति जातिकालसुखादिभ्यः परानिष्ठेति भिन्नशब्दस्य परनिपातः पाणिगृहीति
अगतिसाहिकत पाणिगृहीत पाणिकेत्यर्थः भाष्ये तु पाणिगृहीत्यादीनां विशेष इत्युक्तं अस्वांगपूर्वंत स्वांगमस्वांगं
पूर्वं च तत्पदं पूर्वपदं पुनः कर्मधारयः अस्वांगभूतात्पूर्वपदात्परं य तत्पूर्वं क्तांतं तदंतं बहुव्रीहेरित्यर्थः उत्तर
सूत्रे भाष्ये कल्याणपाणीपादेत्यादौ तस्य वृत्तिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणे नात्रापि तथैवं । चिन्त्या
तत्र तत्र पदुपसर्जनं पाणिपादमिति समुदायो न स्वांगं स्वांगसमुदायश्च न स्वांगशब्देन गृह्यते यच्च स्वांगपाद
तिन तद स्वांगरूपपूर्वपदात्परमिति सूत्रे एवं च करमुखी साघर्षूख्येव जातिपूर्वपदादि तीहापि संबध्यते । यथा

षष्ठीसमासनिषेधात् शेषषष्ठीसमासे ऽप्राप्तेः सुपः परत्वादित्वं दुर्लभं वस्तुतः शेषषष्ठ्या अप्यत्र कारकत्वात्कृदुप
न्तेः पूर्वमेव तत्रापि समासः यथा कथंचित्कारकग्रहणेऽपि कथंचित्कारकत्वमादाय गतिकारकोपपदानामित्यस्य प्र
वृत्तेरत्रत्यभाष्यादुपपदमतिङिति सूत्रभाष्याच्च लाभात् यत्तु तन्निषेधस्यानित्यत्वादत्र वृत्तौ कारकषष्ठ्याः सु
बुत्पत्तेः पूर्वं समासे न तत्रापीत्वं सुलभं सूर्येति सर्वैः क्यप्याद्युदात्तस्वरः शब्दाच्चाप्येतोदात्तमिदं एतेन ङीपो निषे
धेन टापेव सिद्धिरित्यपास्तं सूरीति सूर्यस्य स्त्री याकुंतीयं मानुषी न देवतेत्यर्थः महत्त्वादिति तद्योग एवेष्यो स्त्रीत्व
मिति भावः यवनाल्लिप्यामिति लिप्यर्थको ऽत्र ङीषन्तस्येदमित्यण् वाधकः इति वक्तव्यं चः लिपिरक्षरविन्यासः ८
मातुलेति मातुलानीत्यसंप्राप्ते उपाध्यायाद्याप्ते विभाषेयं या तु स्वयमेवेति अपादाने स्त्रियामुपसंख्यानं
तदंतात्त्वं वा ङीषिति तृतीये ह्रस्वे ति सूत्रे वार्तिकादिति भावः उपेत्याधीयते यस्या इति विग्रहः अर्यैति रूस्वादिस्तदाह स्वामिवै
श्ययोरित्युक्तेः अर्यैति पाठस्तु कैयटाद्यसंमतः स्वार्थे इति अत एव भाष्ये ऽर्याणीत्यर्थे स्वेवोक्तं पुंयोग एवं वृत्तौ तु उपाध्यायी
तिवदर्यीति पदे ङीषमेवोदाहरेत् कर्मण्यणीति सूत्रे त्विंद्रीत्यादि वा यत्यर्थेमिति भावः करणादिति वक्तव्ये पूर्वग्रहणा
दन्तन्त प्रातिपदिकरूपान्यपदार्थे ऽवयववापि पूर्वशब्दे न बहुव्रीहिः तेन वस्त्रेण क्रीतेति वाक्ये ना तद् इति चानुवर्तते

कृदिकारादिति सर्वतइतिच गणसूत्रं अप्रकृतोपीत्यर्थः व्यवस्थितविभाषाश्रयणात्क्वचिन्न सुगंधिः प्रियकतिर्वस्पेत्यादीति
वृत्तिः पुराणशब्दोत्रपठ्यते सयद्यपि अयं पंथानुचितः पुराणइत्याद्यंतोदात्तदर्शनेन घृतादिपाठादंतोदात्तइत्युदात्तनि
वृत्तिस्वरेण ततो ङीप् ङीषोः स्वरे विशेषाभावस्तथाप्यत्रपाठसामर्थ्यात्स्यादेयवेवेतिबोध्यं अजननिरिति आक्रोशे नञ्य
नि रिति जनेरतिः अहन्नशब्दोत्रपठ्यते सामर्थ्यादुपसर्जनाधिकारबाधः दीर्घजिह्वी प्राह्णइति ङीष्यंतोदात्तंबह्वादिराकृ
तिगणः इतिगणरत्नकृत् पुंयोगादा हेतौ पंचमी आख्यायामितिपंचम्यर्थेसप्तमी आख्याशब्दोबोधकपरः आख्या
चोपास्थितत्वात् पुंसएव नास्त्रियाः स्त्रियांवर्तमानस्य स्त्र्याख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः पुंसेव यः प्रसिद्धेः
शब्द इत्यर्थः पुंयोगाद्धेतोः प्रवृत्तिनिमित्तारोपेण स्त्रियांवर्तमानात्पुंबोधकाच्छब्दात् ङीषित्यर्थः योगः संबंधः पुंयो
गात्किं देवदत्ता आख्यायां किं प्रसूता तदभावे हि स्त्रियांवर्तमाने यस्मात्तिपदिके पुंयोगहेतुकप्रवृत्तिनिमित्तकत्वमित्यर्थो
पि संभाव्येत अस्ति हि तत्प्रवृत्तिनिमित्तप्रसवे पुंयोगहेतुकत्वं उक्तः प्रमाने स्याद्भुनेवेति भावः पुंयोगोऽत्र दांपत्यरूप
एवेति भाष्यस्वरसः यथैयेभर्तृपापकृतान्वंधादीन् लभंते एवंच तच्छब्दमपीतिमाध्योक्तेः देवकीत्यादि तु गोरादि
भुवोधमितिकेचित् गोपालिकेति गाः पालयतीति गोपालः सएव गोपालकस्तस्य स्त्रीत्यर्थः ण्वुलंतस्य तु कारक

त्र गुणवचनशब्देन समस्तकृदंततद्धितांतसर्वनामजातिसंख्यासंज्ञाशब्दातिरिक्तशब्दो गृह्यते आकडारसूत्रभाष्यप
र्यालोचनया तादृशानामेव तत्संज्ञालाभात् तत्र हि प्रातिपदिकमात्रस्य गुणवचनसंज्ञाप्रसक्तौ नर्थबोधकत्वेनैताः
क्रमेण पठिताः गुणवचनेत्यन्वर्थसंज्ञया गुणोपसर्जनगुणिवाचकानामेव तादृशानां सा संज्ञेति न रूपादीनां ग्रह
णं जातिपदेनाकृतिग्रहणे इयमवृत्तिजातिवाचकानामेव तत्र ग्रहणात् कदाचिदिशाखत्वात्तदप्येतरेणां च तद्धितांत
त्वादेव आकृतिः एतत्सूत्रभाष्योक्तं सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते आधेयश्चाक्रियाजश्च सोऽसत्त्व
प्रकृतिर्गुणः इति गुणलक्षणं त्वेकदेशयुक्तिर्बहुविशेषणानां वैयर्थ्यात् भाष्यकृतां व्याख्यानाच्च तस्मादाकडा
रसूत्रोक्तमेव भाष्यसंमतमिति भाष्यप्रदीपोद्योते निरूपितं शुचिरिति शुचेर्गुणादिकः किं दिन् उत इत्यस्या
भावेपि खरुसंयोगोपधात्वेन त्वसामर्थ्यान्नात इत्यस्यात्र संबंधः उणादीनामव्युत्पन्नत्वात् रुदिकारादित्य
स्यात्राप्रवृत्तिरित्यभिमानः शुक्लेतीत प्रत्युदाहरणं शुचितं तपरः किं वधूः कासूः वधूः स्नुषा नवोढा स्त्री वा
सूः विकलवाचि स्यादिति कोशबलेन नवोढात्वस्य विकलवाचकत्वस्य च प्रवृत्तिनिमित्तत्वेन खरूपाद्व गुण
वचनत्वात् पतिंवरेति पतिलाभोत्कंठावतीत्यर्थः वह्वादिबहुशब्दस्योक्तरीत्या गुणवचनताभावेन ग्रहणं

शात्स्यात्तत्र नित्यस्त्रीलिंगइति भावः यद्दिपीठरेऽनाकुंडमिति विश्वकोशे तस्य नपुंसकत्वमप्युक्तं पिठरामत्रशब्दो चप
र्यायो पिठरः स्थाल्युखाकुंडमित्यमरे नपुंसकत्वमात्रोक्तिस्त्ववयुत्यानुवादः तच्चैतेन तदानेकविधसंस्थानेषु अमत्रे
षु संस्थानस्य कुंडमवहारेण कुंडत्वे जातित्वाभावादप्राप्तो ङीबिति वोध्यं स्त्रीविषयत्वादिसुपलक्षणमिति वहवः
कमंडलु संस्थानस्यानुगतत्वात्तद्रूपामत्रवाचिनो जातित्वमप्यस्तीति सूत्रं तु नियमार्थमेव अमत्रे जारजायां कुं
डेत्येवस्य परे आवपने चानित्यस्त्रीत्वादप्राप्तस्य ङीषो विधिः आवपनमिति सामान्ये नपुंसके गुणायोगादिति गो
णत्वेऽप्यपदकार्यत्वात्स्वप्रवृत्तिरिति भावः विधित्वात्तु रोधात् गोणाएवास्य प्रवृत्तिः वर्णेऽश्वेदिति तद्विशिष्टश्वेदित्यर्थः
अन्यपाणिनौ मञ्जाद्यः पुंसीस्त्रुत्यासंगतं स्यादिति वोध्यं सूत्रे वर्णशब्दो, शीलाद्यपजेतः कालान्येति श्रौर्यगुण
उक्तेत्यर्थः नील्याअन्निति वृत्त्यनुसारेणेदं प्रतिपदोक्तत्वादन्यकृति ङीषं तत्र विष्ट नीलशब्दस्य वाचाग्रहणं
नत्वस्य लाक्षणिकत्वात् अनाच्छादने इति नीलवर्णवती शाटीत्यर्थे नीलीतिवारणाय चरितार्थे नील्या रक्ता
गौरीत्यर्थे नीलेत्येवोचितमिति परे मैत्रेयेन छाशब्दो अप्रणी आघजेत स्तद्धनीत्यर्थः अन्येति मेषु नादन्यपेच्छति
कमेलं ल्पपतेस्तु कृष्ण शोणशब्दो वर्णवाची वर्णान्तो तणेत्याधुदात्तः अन्यत इति सिद्धे विकल्पार्थमिदं वनीय

तस्यानि कृत्वं ईप्सन्ति योगाशिष्टत्वं चास्य बोध्यं विशुद्धिवाचीति पाठे तस्य वृत्तिनिमित्तक इत्यर्थः अन्ततोसान्निधाना
द्याख्यानाच्च तोपधस्यैव प्रतियोगित्वे नान्वय इत्याह तोपधभिन्नादिति वर्णितात् किं खड्गा आच्छादनः नतिकीतिशिक्षि
त्तिषु न गोरशब्दो वर्णवाची ततो दन्त इतीह पाठः अनड्वाहीति आमनडुहः स्त्रियां वेति वचनात् स्त्रे आम् सूर्यतिष्ये
ष्य इति सूर्यीति नामंगानामुपधाया इति व्याख्याने तु सौरी बलाकेति न सिध्येत सूर्येणैकदिक्त्वरणं तान्[illegible]पिष्ट
एं नमंगेन सूर्यशब्द इति तदासिद्धिः वचनं तु सूरीकुंतीत्यत्र चरितार्थं अणो लोपे प्याभीयत्वेन सोसिद्धेण ए
ति मित्तका स्रोपस्तु या श्रयत्वान्नासिद्ध इति यस्योपधात्वमुपधाग्रहणादेव भाधिकारमभिव्याप्याभीयासिद्ध
त्वमिति बोध्यं यग्रहणं तूत्तरार्थं आमिति निर्देशात्समस्यैकवचनाग्रहणं नक्षत्राणीति नक्षत्रवाचकाद्यो ए
तत्रेत्यर्थस्त्रे नतिष्येण युक्ते तेषु महत्तिष्ये भवस्तेषु इत्यादि सिद्धं मातरि पित्रेति पितामही सित्यर्थमिदं दृष्टं,
करणे ति दंशे ही ली पासेतिकुत अत्र यमजादिषु पचते जोरादिषु मा नाम हि शब्दपाठो नाथे इत्यस्य जानपदीति
जनपदे भवेत्यर्थः उत्सादित्वादञ् प्याद्युदात्तत्वे प्राप्ते तोदात्तार्थं वचनं द्वत्तिरनुच्छेद्या जीविका अत्रत्यप इति
तथा च क्रियाशब्दोयमिति भावः अमत्रे कमंडलुरूपके ढीक मंडुलो जारास्तत्रिवत्ति वस्तुतेषु मानि तिमेदनीको

शब्दः किमर्थ इति प्रश्नः ।। ४ वां पतिशिति स्वामिनीत्यर्थः निपात्यत इतितेन चोदात्त सादेशस्यैव प्रवृत्त्या सपत्नी शब्दस्याद्युदात्तत्वं
किंच समानस्वामिकस्त्रीविशेषस्यैव रूढ्या बोधनार्थं ङीब्नकारविशिष्टोच्चारणं अन्तरा च समानस्वामिकदासिभृत्यादेः सप
त्निस्त्स्यैव समानत्वे चैकस्यैव तत्तत्पत्निसंबंधेन भेदमारोप्य बोध्ये मुख्यसादृश्यवत्पत्निकास्तु न तथा प्रयोग इष्यते त्रिसत्री
ति व्याख्यानादिति भावः सन्नियोगशिष्ट इति तेन तदभावे ङीबपि नेति भावः नितान्तानामिसत्त्राकार उच्चारणार्थः नितन्ता
नामिति पाठे जश्त्वाभावः सौत्रः औरेपतानीति अत्र तत्त शब्दस्योपसर्जनत्वे तदंतमनुपसर्जनमेवानुपसर्जनादिति चात्रत
दंतविशेषणे अन्तरावगस्त्येवृत्तिकृता औरोपेतान्यत्र बहुव्रीहिं कृत्वा ।४ नेन ङीविधिस्त्वं तदनुसारेण चेदं परे तु उपमाना
नीति सूत्रस्य भाष्यस्वरसात् ठिड्ढाणञित्यादौ ।। समाणविशेषणत्वस्य स्पष्टत्वाच्चात्रापि न तथैवोचितं तत्र हि शस्त्री
श्यामेत्यादौ श्यामा शब्दः शस्त्रीमिव उपमेयं तु समासवाच्यमिति पद्धेशस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वं ।। सिध्यति
यद्युपसर्जनस्येति ह्रस्वत्वं तद् कुंभकपाललोहिनीत्यत्रानुपसर्जनलक्षण ईकारेण प्राप्नोति इह सूत्रे अ एपत्यस्य त्रिष्ठ
स्यानेन त्वं समर्थो बोध्य इत्याहुः ।। ४ आर्षमत्रणात्वं वर्णान्ते किं प्रकृतागानिरनंतर इत्याद्युदात्तः ।। अन्तोदात्त इति स्वनोवा
जीजायते इत्यादौ तत्पाठादिति भावः छेदासिकमिति नादेशापवादस्ते नोत्सर्गसमानदेशापवाद इति न्यायात्

त्वादेपषमानमाधुदात्तत्वमपित्त्वादित्वात् ऽपरः पूर्वामभ्येतीत्यादावजादिपाठाद्वावपि ऽआर्येणाकृतमिति प्राक्सुत्रमते:
समासे ऽदंतत्वे भेषजशब्दो ऽमुसल्ल ऽओषधेरूढः भिषजइदमिति सन्ति भैषजशब्दोपि तत्र सुमंगलीरियंवधूरिति तु मत्वर्थी
येऽप्रत्यये बोध्यं प्रकृतिभागावितिन्तकुसन्नियोगेनेति भावः मठवितिवत्त्वंतु माद्युपधायाइति सिद्धं पत्नेनसंबंधेइति स्त्रियाङ्
त्यर्थः संयोगपदं संबंधोपलक्षणं संबंधश्च यज्ञफलप्रतियोगिकैश्वर्यवत्त्वं तदाह तत्कर्तृकेति विभाषा सहशब्दो विध
मानवाची पूर्वशब्दोऽवयववाची व्याख्यानात् तत्र केवलपतिशब्दस्य विद्यमानपूर्वावयवत्वासंभवाद्व्यभिचाराच्च
पतिशब्दे ननु दंतं गस्येत इत्याह पतिशब्दांतस्येति प्रादि नपत्युरिति सपूर्वस्येत्यनेन नपत्यंतस्य गृह्यमाणत्वादिति भावः
वहवो वृषलपतयो यस्या इति कर्मधारयोत्तरपदबहुव्रीहेर्वारणाय हार्थमुपसर्जनपदसंबंधइत्यन्येव बहुव्रीहावि
त्युपसर्जनोपलक्षणं तेन पतिमतिक्रांता ऽतिपत्नीत्यपि व्यस्तेइति विभाषा सपूर्वस्येत्यत्र यज्ञसंयोगइति न संबध्यते भा
ष्ये कथं तु वृषजयकस्य पत्नीति प्रस्तेराव प्रश्नात् वृषलत्वेन यज्ञसंयोगाभावात् पूर्वेणाप्राप्तेः सपूर्वत्वाभावाच्चेत
द्वाप्तेरिति भावः उपचारादिति पाणिग्रहणाश्रयादिति भावः यद्वेति इदं प्रौढमात्तत्कृतिकर्तृकस्तीक्कि पि द्वठमाना
भावात् पूर्वसूत्रेव यज्ञसंयोगइत्युक्तवृषलस्य पतिः स्त्रीति प्रयोगसाधनार्थं सपूर्वस्य किमिति ऽअवयववाची पूर्व

समासोंतार्नोम लौकिकवाक्यएवप्रवृत्या पूर्वमनंग्रेषां प्राप्तिः अनउपधालोपिनइत्यत्रास्यानुवृत्याङीपोपिवाधःए
तेनमध्येपवादन्यायात् डापनिषेधयोरिदंवाधकमित्यपास्तमितिभावः ङीबिति ङनिपितुकुं ङोधनराके पूर्वपदप्रक
तिस्वरेण धकाराकारस्यानुदात्तत्वादुदात्तनिवृत्तिस्वराप्राप्त्यांनोदात्तत्वंनसिध्येत्तत्वं र्कुङमिवोधोयस्या इति विग्रहः
वहुव्रीहिः किंउधः प्राप्ताप्राप्तोधाः प्राप्तापन्नेचेति समासः अमपयहणानञवृतेः अस्वरितत्वादितिभावः निषे
धावपीति अपिताउपधेति ङीप् अनन्यग्रहणेऽनर्थकस्यापिग्रहणात् द्विहायनीवालेति द्विहायनी द्विवर्षागो
रिति प्रायोवादइत्येके वालत्वस्यगोरित्यर्थइत्यन्ये तिसंसंज्ञानञुसंज्ञाशब्दानियतानुपूर्विकाअनादयः ... इति
चइष्टस्यैवविधानमिति ङीवभावविशिष्टस्यतत्रप्रयोगासंभवादनउपधेत्येवसिद्धे इदंव्यर्थमिति चेदुत्तरा
र्थत्वात् योगाविभागस्तुअर्थएवतद्धुनयन् लक्षणांतरसिद्धमुदाहरति वेदेपंचदाम्नीति ... चित्रुशत ... इति
पाठः केवलमामकअस्मच्छब्दादण् तवकममकावेकवचनइति ममकादेशः भागधादास्त्रीलिंगात्स्वार्थेऽभिधेये
स्वार्थिकेपुलिंगानिवृत्तेरपिसत्वात् स्त्रीत्वं पापशब्दोऽशीघ्यचातद्धतिवर्त्तमानः द्विपोअपरः पवर्गमध्योवां
तादित्वादंतोदात्तः उतापरंपाद्दिदेवानित्यादौ उतापरीभ्यो मघवेत्यादौ चांतोदात्तस्याठात्पूर्वमनपष्ठापरमि

ण नरस्य चेति वक्तव्यमिति वार्त्तिकेन चाद्युदात्ततायाः सिद्धेः । रूपाभावे ग्य नयधा तद्धर्मी नरत्वजातिविशिष्टे वक्तव्य इते
ग्रहणए वेवसि त्तव्य त्कृत्तेरिणी चेति वचनं वस्तुनि भवे वा स्तम्य इति दिगादित्वात्सं साध्य प्रत्याख्यातं भाष्ये नित्यानां शा
ब्दानां यथा कथंचिदन्वाख्यानं कार्यमिति केयटः । रूपासर्वदोषपरिहार इति तदाशयः । पदस्वाप्पृथकारो याडा
पइत्यत्र सामान्यग्रहणार्थं चकारस्यानुबंधत्वसंपादनद्वारा सामान्यग्रहणाविघातकत्वं तच्चरितार्थ्यमपि
वद्धाप्रवृत्त्या दीपरत्वात् चित्स्वरः पित्स्वरं बाधते इति बोध्यं । चाप इति । रावं च गोक स्यशाद्स्यगर्गादिपठितत्वाज्ञंतस्य
दी चायां मतेनेनैव चापः सिद्धेः सङ्क्रो प्रादिषु त पाठ्यः संप्रसारणं तु तस्य नेद्यमिति त्स्य ब्यं भाष्ये स्पष्टं तिक्तं अद्धे भ्याइ
ति ङीपोपवादः उत्तरार्थ इति इह करणं तदनित्यत्वज्ञापनार्थमिति केचित् इति स्त्रीप्रत्ययाः । स्वौजसमौ टि तिवि
हितं स्वादीनामर्थविशेषव्यवस्थां दर्शयितुमाह प्रातिपदिकार्थेति इदमपि सूत्रं क्रियायोग एव प्रवर्त्तते ततोऽ
स्ति क्रियायाः सर्वत्र सत्त्वात् प्राख्यातार्थकर्त्रादिना भेदान्वयेन तत्कारकः क्रियायोगो बोध्यः । प्रथमान्तार्थस्या
पि क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः । तत्र कस्यादिशब्देषु लिंगस्यापि प्रातिपदिका
र्थत्वाल्लिंगग्रहणमनर्थकमत आह नियतेति यास्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स

बहिर्भागः करभस्तद्वद्रूपस्यास्त्यर्थः उपचारादिति पाठः फलद्वयं इति निमित्त तस्योरूपदार्थे आरोपादित्यर्थः एवं च
समासस्योपमानोपमेयभावावबोधकत्वेन न पूर्वसूत्रप्राप्तिस्तदाहारोपे च सति निमित्तमित्यस्यत इति भावः ननु सहश
ब्दग्रहणं व्यर्थं सर्वस्योरुमत्वेन सहप्रयोगस्य तत्सममभिव्याहारे अर्थत्वेन सहोरूरिति प्रयोगस्यैवाभावादेतत्आह स
हेत इति रतिश्रममिति शेषः सहविद्यमानावूरू यस्याः इत्यर्थ इति कैयटः अतिरमणीयावित्यर्थ इति तदाशयः
कमलानि कमलानीतिवत्कद्रूरिति नागमातुः संज्ञा अच्छेत्यर्थमिति छंदसि कद्रुकमंडल्वोः छंदसीत्यनेन
नैव सिद्धिरिति भावः अज्ञोय इति शार्ङ्गरवादीति लुप्तपंचम्यंतं अत्र इति च षष्ठी अनुपसर्जनादिति विभक्ति
विपरिणामेनास्य विशेषणं रावंटिष्ठत्यत्रापि सुवचं तद्दन्तं पंचम्यंतत्वमपि सुवचं अन्यो कार इत्यपि पाठः क
चित् शार्ङ्गरवाजाति लक्षणे ङीपि प्राप्ते वचनं अपवादिह ध्योर्ङी णो पुत्रशब्दोत्र पठ्यते तस्य पाठसामर्थ्यात् जाति
लाभावेपि ङीन् नृनरयोरिति यद्यपि नारीति नरशब्दे नसिद्धेः नरीति तु प्रयोगे ङीषा दुर्वारं जातिग्रहणानुवृत्त्यात्रा
स्याप्रवृत्तेरिति नरग्रहणं व्यर्थं तथापि नरत्वजातिमात्रप्रतीतिपि पाद्यपि वायां नरीति व्याप्त्यर्थं तद्ग्रहणं अत्रा
कारस्यैव वृद्धिर्लीङ्स्यानुसारिव्याख्यानात् वक्तुत इदं गणसूत्रम नार्षं तु नरस्य च धर्मो नारीतिक्रमतो जिति सूत्रे

चरितार्थत्वेषांक्वचिद्विधानामपिकोशात्सिद्धत्वात्तत्रव्यवस्थार्थतया एव वक्तव्यतया सुप्सुपेत्यमात्रेप्रवृत्तौतस्याप्यसंभवेन
तद्वैयर्थ्यस्यैवमेव प्रकारार्थत्वे प्रमाणमाह भाष्येइति तत्रहि शास्त्रभृति छिन्नु च्यते शस्त्रभृति छिपिद्दश्यते शलाकादे
वर्णीककुद्दावर्णीयाचतेमहादेव इत्युक्तं भाष्यस्यापि गुप्त्रे पेप समानस्य शलाकाकारे दोर्वर्णी त्यर्थः छांदसः कादि
लोपः एतेन दोषइत्यकारांतस्यद्वृषणवाचिनो दोषन्ना देश इत्यपास्तम् ते न पदंघ्रिरिति न च कोशस्य पदादीनां पादा
द्यादेशत्वे पादादिभ्यः पृथक् पदादिवचने तत्र व्यर्थं नहि स्थान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति स्थान्युपादाने-
पर्य नैव तदर्थाभिधानसंभवे मर्थादेशस्यार्थबोधनात् अत एव सा द्यादेशानां कोशेऽनुपन्यासः इति वाच्यं पदादीनां भाष्य
रीत्याऽनादेशत्वात् तत्वेऽपि तज्वत्कोकुरितिवद्व्यवस्थार्थमस्याव[illegible]कत्वेन सोपरतोहृदादीनां प्रयोगार्थं प्रकारार्थ
त्वस्यावश्यकत्वात् स्पष्टं चेदं वार्तिके तिसूत्रे मूले कोशे शब्दाः प्रर्थपरा एव शक्तिग्रहस्तु पदत्वहेतुकानुमानेन सामा
न्यतएव पदप्रकारकः एवं च विष्णुनारायणइत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थः इति क्रमेण बोध इत्यादिमं
जूषापां नामार्थवादे विस्तरेण निरूपितं एतेन त्यदमन्वकवाचकमिति शक्तिग्रहस्तु स्वत्वप्रसिद्धमादायतत्तमन्तुल
वस्यानियतः पश्चान्मनसेवकत्र घ्नेदे विसरस्वति इष्टे काव्ये विहृश्रणानिते घ्नेनामानीत्यादौ एतानि तवनामानि

२०

तेऽप्यर्थोपिप्रत्येयिषन्नइतिसिद्धये आदेशपक्षेन पंचमीसमासेन तत्सिद्धौ उभयग्रहणं सहार्थेमितितिनञ्भावः इतिपक्षेत्विति
तु नास्यानित्यत्वं सूचितं च विगणय्येति भाष्योदाहरणमपि तदनित्यत्वेराव संगच्छते अतएवहेगोरित्यत्र हेह्वे स्यानिर्वर्त्य
त्वसंबुद्धिलोपः पूर्वस्मान्निमित्तत्वेनाश्रितादितिव्याख्यानेतु नमानं केचित्तुपूर्वस्मादव्यवहितपरस्य कार्यमेव स्यानि
वर्त्यं प्रविगणय्येत्सादेस्यानिवद्भावलभ्याकारस्यैवमपदेशिवद्भावेनलघुपूर्वत्वमादायनदोषः तदनित्यत्वेचनमानमित्या
हुः पूर्वत्रासिद्धेनेति अतिदेशाद्वा घात्रिपाद्यत्रासिद्धत्वेनव्यापत्तिञ्चानुवादोयंतस्मात्लंत्वतिदेशांतराणांवत्तिप्रटितानांत्रिपा
द्याप्रवृत्तिबोधनमतएवामीहीरपेणेसादेमीत्वणत्वेभवतः अत्रैकारस्यादस्संवंधित्वंयेइत्यस्यैकाज्जुत्तरपदत्वंचांत
वद्भावाधीनं नस्यदोषः इदंवाचनिकमेव नमुनेइतिसूत्रेनेतियोगविभागस्तुभाष्येनदृश्यते अतएवसिद्धकांडवार्त्ति
केकृतारब्धं नलोपःसुविितिसूत्रेचसूत्रकृताप्रकारार्थमितिप्रकारः सादृश्यंनचवस्तुत्वेनमांस्पचनीत्यादावपिनलुमतेति हे
निषेधानित्यत्वाच्छब्दस्यादिपरत्वेबोध्यंशब्दत्वेनसादृश्यमित्यन्येतन्नवाशोक अजरोगेच्छिसस्यैवेयप्याप्तेः नासिका
यापन्नासच्चुदेषुनासितिभाष्यपठितवार्त्तिकस्यैवेपर्याप्तेश्च आसन्यंप्राणमुरित्यत्रापितद्वदेवशसादिप
रत्वं अत्रनसुप्रभृतिषुच्येतिवाच्येशसप्रभृतिष्वित्युक्तान्यत्रकचिदेवप्रहृतिर्वाध्यते अतएवप[illegible]तहान्निशांग्रहणं

षेविधाविति निषेधस्तु उगिद्वर्णग्रहणवर्जमित्युक्तेः नाप्रहोगिदंतादिति भवतीति व्यपदेशिवद्भावो प्रातिपदिके नेति निषेधस्तु स
त्रापांताद्दिशब्दविषय एवेति भाव भवतु इति उगितः प्रातिपदिकस्यापि सत्वात् प्रत्ययमात्रग्रहणाभावे न प्रत्ययपक्षे ग्रहणे इ
ति परिभाषाया अप्रवृत्त्या निर्यवमतीत्यादौ न दोषः अंचेनास्त्विति नलोपिनो चतेरित्यर्थः नियमोपि नलोप्यंचति विषय एवे
ति निरूपितं व्यपदेशिवद्भावलब्धमर्थं स्पष्टप्रतिपत्तये आह वन्नंतादिति न न्वेवं प्रत्ययग्रहणपरिभाषया वहुधीवरी न सिध्ये
तैदत आह तदंताच्चेति तत्परिभाषालब्धवत्त्वे तेन प्रातिपदिकस्य विशेषणादिति भावः सामान्येति सूत्रेणु वे धातुच्चारणात्ते
दनुवंधकपरिभाषाया विषयो नेति भावः इदं मनुवसोर्जो ग्राच्चाविति सूत्रभभाष्यके पठ्योः स्पष्टं इदं सूत्रं न ङीप् विधायकं
किंतु अन्ने भ्य इति प्राप्तङीवनुवादेन नन्तसंल्लियोगशिष्टरभावमात्रविधायकं उभयविधौ गौरवात् शर्वरीति शृधातोः र
न्येभ्योपि दृश्यते इति वनिपूर्ण तत्र सिध्यतीमाह हशोनाद्धितिहित इति अर्थैव नो ग्रहणात्लेहमघोनी कनिप्रत्ययांत निपातित
स्येदं वहुव्रीहौ वा अनो वहुव्रीहेरिति प्रतिषेधप्राप्ते इदं सनञ्च वार्तिकमन उपधेति सिद्धङीवनुवादेन रादेशविधायकं २
अन्नराणे वदमनुपधालोपिनि सुपर्वेत्यादौ नेति विकल्पार्थं सिद्धावनोर च इत्यापि तनु अम न्ले भ्य इत्येतत् ङीप् विषयमेवे
त्युक्तं पचेङादिति तेन द्विवचने रूपत्रयं कृत समासांत इति उत्तरसूत्र अन्यभिधेयायां न स्येव सं भवे नाप्यधिकारात्तु

द्राचाद्र इति तदर्थः तस्य लिंगजात्यंतरनिवृत्तिपरत्वे पूर्वजातिमात्रविवक्षया महच्छब्दस्य शूद्रशब्देन मयूरव्यंसकादित्वात्समासे ततः
स्त्रीत्वविवक्षायां महती शूद्रेत्यर्थे महाशूद्रेति टाबेव अमहत्पूर्वेत्यत्र जातिरित्यस्यासंबंधेनुपसर्जनाधिकारस्य प्रधानेन तदंतविधिस
त्वाज्जातेरिति ङीष् स्यात् शूद्रशब्दे जातिवाचकत्वस्य स्त्रीत्वशूद्रशब्दार्थसमवेतत्वस्यापि सत्वेनात्र टाप् निषेध इति भाष्यप्रदी
पोद्योते निरूपितं महाशूद्रीति आभीरी तु महाशूद्री स्यादमरः ब्राह्मणादुग्रकन्यायामाभीरः नृपाच्छूद्रायामुत्पन्नो उग्रजातिः
कन्या अत्रानुमसंकराणां मातृजातित्वात्तत्र तां जातिमारोप्य शूद्रशब्दप्रयोग इत्यपि शूद्रशब्दार्थेवाने वेति शूद्रशब्दा
र्थसमवेतस्त्रीत्वमप्यत्रास्तीति तदर्थसमवेतस्त्रीत्वेपि शूद्रशब्दादेव टाप् स्यान्न तदंतात् ग्रहणवत्त्वेतीति निषेधादिति तदंतवि
धिज्ञापकता नासंगता अत एव शांखयनस्तो ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा एव भवंती
त्युक्तमिति भावः यत्तु शूद्राभीरमित्यादौ सामान्यविशेषवाचित्वान्न द्वंद्वाभावमाशंक्याभीराज्ञात्यंतराणीति त्यहाहीनि तिस्
त्रे भाष्यप्रदीपोक्तं तत्त्वनारोपाभिप्रायेणेति न तद्विरोधः अजादिराकृतिगण इति न नमुने इति सूत्रे टापामादेशादिति भाष्यप्र
योगः सिद्धः प्रथमाध्यायचतुर्थपादे चमसवदविशेषादिति सूत्रे शंकरभाष्यवाचस्पत्योरजायां छागेति टावंतप्रयो
गो दृश्यते तत्र छागशब्दोप्यजादिष्विति केचित् उगितश्च उगिच्छब्देन प्रातिपदिकस्य विशेषणात्तदंतविधिः प्रत्य

विधिरिति भावः न गौणे इति अयं भावः समानाधिकरण्यसंबंधेन लिंगाद्यन्वयिबोधकत्वविशिष्टमयपदत्वेन समुदायस्य नाम
पदत्वमिति भावः वस्तुतोऽर्थस्य प्राधान्याप्राधान्याभ्यां येन सर्वनामसंज्ञा साहचर्येण च प्रसिद्धं तत्र अंगपरं तत्रान्तरे ह्याऽनुपसर्जनीभूत
स्यैव लिंगाद्यन्वयित्वेनाग्रहणेन समुदायस्य नाम पदवसंज्ञा अत एव भाष्ये सर्वनामसंज्ञासूत्रस्योपसर्जनप्रतिषेधानुवृत्त्या
उच्चैः सौ तिवेसादावप्रधानत्वाभावमुक्त्वा अनन्यस्याख्यानरीत्यैव वा यत्रार्थे तत्र तस्याख्यानमुक्तं मेवं च वादिहितविशेषणत्वं गाहेयो सर्व
एवं यथा त्यरत्वस्याप्यभावात् उच्चैः रौ उच्चैः राभ्यामित्यादौ रभिधाने तु नमानं अत्र तद्भा। एवभाष्येऽणत्लोक्तं अलिंगत्वादिति
न त्विदं सदृशं त्रिष्विति विरुद्धमतत्त्वाह लिंगेत्यादि अयं भावः यथोपक्रमोपसंहाराभ्यां प्रबलपरापाः अप्यस्याः श्रुतेर्भीप्य
प्रामाण्यादत्रोपसंहारस्थयानत्र प्रामाण्याद्देवलिंगाद्यभावपरत्वापीति विभक्तिवचनशब्दोकारकसंख्यापरो प्रत्ययपरत्वेऽस्य त
रवे यथापत्तेः लिंगश्चित्यादिविषयसप्तमीतत्तद्विषये सादृश्यं च लिंगाद्यभावास्त्रयत्वेन लिंगाभावेन सादृश्यादेव यद्विवि
धं रूपं तत्प्राप्नोतीत्यर्थः प्रसंगादाह वक्ष्यतीति वधो ह्यांदसत्वेन हश्वयोग अत्रिंस्य भागुरिराचार्यैः अपि साहचर्यादेवष्वा
देरकारस्यैव लोपः इदं भाष्ये न दृश्यते निशादिशो रिगुपधलक्षणे केदंत त्वादेव टाप् ... निदिगीत्यपि अत एव श्वापप्रा
तिपदिका दितिसूत्रे आपग्रहणं न कार्यमकारान्ताहाप् तत्रांतवज्ञावान्प्रातिपदिकत्वेनैव सिद्धं यस्तर्हि अन कारान्तान्कुंचा उ
ष्णिहादेवविशतित्यत्राप्यकारान्ता देव कुंचानालभेर्ते उष्णिहककुभौ देव विशामिति अंत्येक प्रत्ययएव विधय इत्युक्ता

पातपरिभाषयाबाधात् न चैतस्याः सन्निपातविघातकत्वे बाधेपि संज्ञाबाधे मानाभाव इति वाच्यं राज्ञिविषयसन्निपात
निमित्तकार्यविघातकस्याकुत्वे चेति निषेधस्य तया निवृत्तावपि उपादानस्तेन तत्र कित्वापत्तेः कित्वफलं तु नन्व
सन्नियोगशिष्टत्वसिद्धिरेवं चोपादेस्तेनेति स्यान्तत्र हि किं निव्यपदेशान्निर्देशादेवंत्वप्रवृत्तिकाले कित्कार्यस्याति दृष्टस्या
भावात् तस्मादनयासन्निपातविघातकस्य स्वयमनिमित्तमिति परिभाषार्थः एतेनात्राकजादिस्यादिष्वपास्तं अकजाधिक
वाक्यतापन्नाव्ययसंज्ञायां गुणादेरसिद्धत्वाच्च लुगकवाक्यतापन्नानुनगुणादिनेति तरंगाद्वयोरपि शब्दतः सुवाश्रयत्वा
त् अव्ययादाप्सुपरित्रियेत्यतो लुगनुवर्तते विहितेति अंगसंज्ञायां विहितत्वाश प्रवेशेन विहितत्वप्रत्ययतिरूपितांगवि
शेषणादित्यर्थः अवाप्सु अथामाहि प्रस्तांगस्याव्ययरूपस्यैव प्रत्यासत्त्याग्रहणमिति भावः तेन कुंभकारेभ्य इत्यादौ सन्नि
पातपरिभाषया अव्ययसंज्ञानिवृत्तिद्वारा लुग्निवृत्तिपरभाष्येण न विरोधः अमुष्मै सावित्यत्राधिकरणशक्तिप्रधा
नस्य अमुष्मै सप्तमादस्य वृत्ति विषयेशक्तिमत्प्रधानत्वात् द्वितीयां तत्तयाऽत्यादरः अंतावर्ये इति समासे अव्ययवद्भूतो
च्चैः शब्दात् अव्ययात्परत्वेन लुक् स्यात् समुदायस्य तु नाव्ययत्वं लिंगाद्यन्वयित्वादित्यभिमानः समुदायस्यापित
त्वमार्थाव्ययसमाधत्ते यद्यपीति तदंतेनेति शब्दस्याविशेष्यत्वात् प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वाच्यानिकस्तदंत

सजिंग्भ्योः पूर्वान्तर साहचर्येण पदांतेपि विशिष्यपत्त्व बोधनेनन तत्सामर्थ्यात्कुत्वबाध इति भावः अत एवोपपदकास्य च स्र
त्रस्यो भाष्यप्रयोगः संगच्छते निपातनादेवेति निपातनेन तस्य नयोरपवादाप्रवृत्तिमात्रबोधने कुत्वं तु स्वस्रा स्त्रीलौ वए तेन
निपातनता दृष्यदांते कुत्वापत्तिरिति निरस्तं अस्य रूपावत्स्विति इदमेव त्यायं ऊर्गिति अयं पुंलिंगोपिनपुंसकस्येति सूत्रेव
हुर्जइतिकैयटात् नरनानामिति वहुर्जिनम् प्रतिषेध इति वार्त्तिरीत्येदं अचः परो यो ऊरू तदंतस्य हुमिति तत्त्व व्याख्या
नात् भाष्यमतेतु जुमो अव्याप्तिरेवनेतिबोध्यं नचैवं कुडानीत्यसिद्धिः इकोचीति सूत्रे चः सर्वनामस्थानेइत्यनुवृत्ति
सामर्थ्यादिकल्पेन साहचर्याच्च सर्वनामस्थानइतिसप्तम्याः षष्ठीप्रकल्प्य वाक्यभेदेनाजंतस्य तत्र नुमविधानाद
दोष इति भाष्ये स्पष्टं कायत्तद्दीदिस्यादेदिवञोदिति सूत्रभाष्योदाहृतेऽचः परऊलं जातेरा अपपणान्तदोषः अंता
दिति इदं वाचनिकमेव वहूर्जेराद्यमात्रविषयकं वहूर्जीति श्चुत्वस्यासिद्धत्वादनुस्वारपरसवर्णौ बोध्यः स्थानिवद्भा
दिते क्को लुप्तं नेति त्वसार्वत्रिकमिति भावः स्पष्टं चेदं दीधीवेवीटामिति सूत्रे कैयटे जायंते नवसोतथामि न वभ्यांभि
सभ्यसां संगमे षट्संख्यानि नवैव सुप्यथ जसि त्री एवं तद्वच्छसि चत्वार्यम्व व च स्ञ कस्य विभुधा श्रादस्य रूपा
णि तङ्गा नं तु प्रतिभाति चेल्लिंगादिर्नुबाएमासि कोत्राबधि रिति प्राचीनस्य प्रश्नः कप्रक्रिपातात्किं कस्यप्रश्ने तदुक्त

सारेणैव श्लोकद्वयेनोत्तरमाह गवाकृशब्दस्येति शब्दपूर्वपरत्वेनापूर्णार्थत्वान्न तस्य लोपः भेदनइति आद्यादित्वात्तसिः भेदे
नेत्यर्थः नवेति द्वंद्वांते श्रूयमाणत्वात्प्रत्येकं नवेत्यर्थः चर्तस्येति तेन गतोऽत्र पाणामाधिक्यं नेत्यर्थः कुकूपदेह इति पूर्जायामि
त्यर्थः अत्र श्वाहीति सप्तविंशत्यधिकापंचशतीत्यर्थः मःशतेति शतप्रत्ययइत्यर्थः आश्ची[illegible]चेतिवर्त्तते उत्तरसूत्रे नित्यग्र
हणाल्लाभ्यस्तादित्यतो नेतिनानुवर्त्तते निषेधस्य प्राप्तिपूर्वकत्वादत्र च प्राप्त्यभावात् नुम्ग्रहणस्यस्यार्थे शतुरव
यवइति परोयः शतेति नोक्तं तुदंतीत्या दावेकादेशे उभयत आश्रयणेंतादिवद्भावाभावेन अपवर्गीलाभेन च नुमभावाप
त्तेः अत्र वर्ण आशतरभिन्नावयववर्णग्रहते शत्रकारेणाभिचारात् शापश्यनोः आदिति किं भातीत्यादौ नुम्नुमभावाप
अत्र यथाप्रत्ययलक्षणेन स्यादात्रिशु तौ तु वर्णप्राधान्यान्न प्रत्ययलक्षणं न लुमतेति निषेधस्तु प्रत्यासत्त्या लुप्तप्रत्ययनि
मित्तांगस्य कार्यं वेति भावः यचंतीत्यादि वहुवचने नपुंसकस्य झलचइतिनुम् निरवकाशत्वमित्तिइदं छ दिरूपधिवले
ठे त्रि इति सूत्रे शेषाद्विभाषेतिसूत्रे च भाष्ये स्पष्टं परंतु निरवकाशत्वरूप प्रतिपदोक्तत्वस्य वाधकताप्रयोजकत्वं प्र
कृते तद्भावे नावाधकत्वेपि प्रतिपदविधित्वेन शीघ्रोपस्थितिकतयापूर्वं प्रवृत्तो नियमकत्वबाधकत्वाभावेन पूर्वं
दीर्घादि तनोनुमित्वांपीत्येवेत्याहुः धनुरिति वौरिति दीर्घस्तु नरे फांतस्य धातुत्वात् श्रेयांसीत्यादौ युगपद्द्वयोरसंभ

वर्णाश्रये नास्ति प्रत्ययलक्षणं ५

तदर्थे इत्यर्थः अन्वयानुपपत्तिः पूर्वकाललक्षणपदेएवप्रत्ययोत्पत्तिः सर्वत्र शक्यार्थ एव शक्यतावच्छेदकारोपएव च लक्ष
णेति न लक्षणासंग्रहदोषः तदादिशब्दानां तत्तत्प्रत्ययसमभिव्याहारे सकललिंगबोधकतया न किमपि लिंगं नतोऽन्वीयते
पञ्चमीति किं इति नतद्बोध्यलिंगस्यात्र प्रातिपदिकार्थशब्देन ग्रहणमिति लिंगग्रहणमिति भावः लिंगमात्रेति लिंगस्येत्यर्थ
के इति क्रमेणार्थः यद्यपि विशेष्यविशेषणभावो व्याधिकोभासते तथापि तस्यवाक्यार्थत्वेन बहिरंगतया न स्वार्थनिमि
त्तकप्रथमप्रवृत्तसंस्कारबाधकत्वमिति बोध्यं अभेदेन संसर्गेणेति इतरसंबंधानवच्छिन्नविशेषणविशेष्यभावसं
सर्गेणेत्यर्थः अभेदस्तु न संसर्ग इत्यन्यत्र प्रपंचितं इहोक्तार्थत्वादिति उक्तार्थानामप्रयोगात् प्रातिपदिकप्रतिपादि
तसंख्याविशिष्टसंख्यांतराभावाच्च तदप्राप्तिः अनन्वितार्थकविभक्त्यपेक्षया एवं वा द्रकविभक्तेरेवन्याय्यत्वात् घा
दिभ्यः सर्वविभक्त्यापत्तिरिति भावः लिंगविशिष्टपरिभाषयैव ङणीत्यादेः प्रथमासिद्धिः परिमाणशब्दश्चापरिच्छेद
कपरः इत्थं मानादिष्वपि प्रथमासिद्धिरिति बोध्यं परेत्वत्रसूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रय
श्च सबन्धमुख्य इवारोपि न तदाश्रयोपि अनएव गोपीत्यादौ स्वादिप्रकृतेर्ल्लीह्यणीकतेपि न दोषः अतएव लिंगग्रह
णं सार्थकमन्यथास्वमोर्नपुंसकादित्यादिशास्त्रप्रामाण्येन लिंगस्यापि प्रातिपदिकार्थतया तद्वैयर्थ्यं स्पष्टमेव अत

एवं स्त्रियामिति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इति भाष्ये सिद्धान्तितं तस्माच्छब्द इत्यत्र पुंसीत्यस्य पुंशब्दस्य प्रकृत्वे इत्येवार्थः अभि
हितेप्रथमेति वार्त्तिकस्य तत्र प्रातिपदिकार्थगतकारकशक्तावन्येनाभिहितायां स्वार्थे प्रातिपदिकात्प्रथमेत्यर्थः इति न त
द्विरोधः एतेन तन्नये कारकस्य प्रत्ययार्थत्वं तत्र तु तत्त्वेनेति विरोध इत्यपास्तं तट्टादिशब्दानामपि लिंगं वाच्यमेव द्योतका
स्तु विसर्गादयः एवं तल्लिंगं बुद्धिस्थीकृत्यैव तस्य विसर्गादेः साधुत्वान्वाख्यानं नियमांशनिवेशस्तु न मानं इदमेवा
भिप्रेत्य वृत्तौ प्रातिपदिकार्थः सत्तेत्युक्तं सत्तेति प्रवृत्तिनिमित्तोपलक्षणं आश्रयस्तु तदाद्धि सत्वाल्लभ्यत इत्युक्तः एवं च प्रा
तिपदिकार्थ इत्यस्यालिंगा लिंगप्रवृत्तिनिमित्तकाः अव्ययपुमादय उदाहरणं लिंगविशिष्टपरिभाषया स्त्रीशब्दो
प्यस्यैवोदाहरणं अन्ये सर्वे लिंगाधिक्ये इत्यस्य द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन प
रिमाणमपि लिंगवद्विशेष्यान्वय्यर्थः एवं च तस्य लिंगवत्प्रातिपदिकार्थत्वाभावात्परिमाणग्रहणं द्रोणः परि
माणमित्यवतु द्वोव्राल एणाविति तत्प्रयोगः द्रोणशब्दस्यानेकार्थत्वाद्वाम्र लोकं तु न प्रयुक्तं द्रोणो व्रीहिमानयेत्यस्या
पत्तेः किं च तिङ्समानाधिकरणे प्रथमेति वार्त्तिकैकवाक्यतया भेदान्वये द्रोणो व्रीहिरित्यनिष्टं न च यद्यामे से द्रोणा
दीनां वृत्तिस्तस्यानेकत्वे न परिमाणमात्रपरत्वेन तद्बोधे न च व्यभिचाराज्ञेयस्य नियत्तोपस्थितिकृत्त्वाभावेनैप्रा । ति

१२९ कस्वारस्येन प्रथमायास्तत्रतत्रकारकविभक्त्योक्तिपरमाष्येण चक्रियायोगस्य प्रथमायाः प्रवृत्त्यासातेति प्रथमायामात्र सह शीमि
त्यर्थे साधुत्वात् इत्यन्यत्र विस्तरः एतद्योगविभागसिद्धसमासस्य विशेषसंज्ञा न संत्येव ततद्धिकारेष्वपाठात् जीमूतस्येवे
तिश्रत्रपप्राप्येत्वादिप्रयुक्तोव्ययीभावस्तु न तत्र तस्येवेति निर्देशात् अव्ययीभावस्य मैयं भवतीति भवतेर्णीउपसंख्यानमिति
कर्त्तरिणः महासंज्ञाकरणं प्राचामनुरोधात् योगो विभज्यते इति भाष्येत्विदं न हृष्यपतेः अयदिशमित्यादिमांतानां स्वरादि पाठो
व्ययत्वमूत्र पदिष्टेनेत्यादि तु चिंत्यमेवेत्यन्ये ननु समासगतेर्वैतिर्विभक्त्या प्रथमां तत्वे अभीषमाणैकदेशश्रितादे
श्रितस्य पूर्वनिपातापत्तिर्निर्दिष्टपदं चव्यर्थमत आह सनासप्राप्ते इति समासविधायके शास्त्रे इत्यर्थः न च राज्ञः कुमारीं
श्रितो राजकुमारीश्रित इत्यत्र द्वितीया श्रितेति सूत्रे प्रथमानिर्दिष्टत्वेन कुमारीशब्दस्य पूर्वनिपातापत्तिरिति वाच्यं अप्र
धानस्योपसर्जनमिति शास्त्रांतरोक्तमहासंज्ञाकरणेनास्य तद्विषयकत्वात् समासशास्त्रे प्रथमानिर्दिष्टमप्रधानत्वसमानाधि
करणोपसर्जनवदिति वाच्यार्थे निष्पन्ने प्रधानत्वस्य ससंबंधिकत्वात् प्रतिपदं प्रधानं तं प्रति तदुपसर्जनसंज्ञमित्यवगतेरदो
षात् इति भाष्येणैवं समाधानात् प्रकृते च न राजति रूपितमप्रधानं कुमारी इति न तद्रूपेणास्य पूर्वनिपातः न चैवं पूर्वकायो
घसिद्धिः कायनिरूपिताप्राधान्यस्य पूर्वपदार्थेऽभावादिति वाच्यं समासशास्त्रस्य प्रथमानिर्दिष्टशब्दगताप्राधान्यस्याप्र
पणेनादोषात् समासशास्त्रे यं प्रतिपदं प्रधानं तं प्रति तदुपसर्जनमित्यर्थात् भवति श्रितादीन्प्रति द्वितीयांतं तत्पासह युक्तार्थत्वे
पातार्थस्य प्राबल्यगुणेघन्वेपित्वाभावरूपाप्राधान्येपि तत्सम[illegible]र्थ्यविहतत्वप्रयुक्तत्वापेतत्वद्धीनत्वरूपाप्राधान्यप्रतीतेः अन्नतत्रावसम
कहपोरन्यो कस्यापरेणसहागन्तव्यमित्युक्ते दुःखं हि ष्यपते प्रकृते द्वितीयांतं श्रितादिधीनं तावेतावसमासाघटकत्वात् श्रिता दि

मा।

रेणसंपूर्वकास्य तेश्च संश्लेषोपि। प्राक्कडारादित्यत्र ग्रहणमावर्तते तेन प्राक् समाससंज्ञेका भवंति तत्संज्ञाः संतोव्ययीभावादिसं
ज्ञका इत्यर्थात्तयोः समावेश इति भाष्ये स्पष्टमन्यथा कडारत्वात्यपि पः स्यात् इति दिक् अत्र सुबित्येकत्वं विवक्षितं तेन महिष्याश्च
जापाश्च क्षीरमित्यत्र सुवंतसमुदायेन न क्षीरशब्दस्य समास इति कैयटादयः परे तु अन्नवाधत्वादेकत्वाविवक्षेवं किं च तद्विवक्षा
यामेकेनैव केनचित्सुवंतेन किंचित्सुवंतस्य समस्ततन त्वन्यैरन्यानि तस्मात्सुबित्यादौ जातिविवक्षा एवं च यथा स्वांगग्रहणेन स्वां
गसमुदायस्य न ग्रहणं स्वांगत्वस्य ग्रहणमिति नो प्रत्येकसमाप्तत्वात् एवं सुवंतत्वादेरपि प्रत्येकसमाप्तत्वेन सुवंतादिग्रहणेन न सुवंता
दिसमुदायस्य ग्रहणमिति नोक्तदोषः स्पष्टं चेदं मतुप्सूत्रसमर्थसूत्रयोर्भाष्येतत्र सकैयटादीनां तु प्रमादः अत एव विभक्तिश्चेति सूत्रे प्र
तिप्रत्ययं विभक्तिसंज्ञेति पक्षे प्रथमयोरित्यादौ विभक्तिसमुदायस्य विभक्तिग्रहणेनाग्रहणात् प्रथमयोः प्रत्यययोरेव ग्रहणं न प्राप्ते
तीति उक्तं कैयटेनेत्यन्यत्र विस्तर इत्याहुः अन्तु व्यचलदिति अनोव्यचलदित्यनेन वेश्याचलदित्यनेयुगपत्समासः अन्तु इति सुवंतेन
व्यचलदिति समुदायस्य समर्थत्वात् सुपेति इदं लक्षणमधिकारस्त्वग्रे त्वेफलं तु इदेवं कुरोतिमातुः स्मरतीत्यादौ विशेषणसमासस्त
षष्ठीसमासयोरभावः सुपो धात्वंगनिमित्तस्य सुप इत्यर्थभ्रमवारणायांगस्य सुप इति नोक्तं पूर्वं निपातत इति भूतशब्दस्यैवेत्यर्थः अ
स्यप्याविनिगमनाविरहेण प्रथमानिर्दिष्टत्वाविशेषादनियमः स्यादिति भावः अत एव निर्दिष्टग्रहणाहीदृशे विषये व्यवहारके सामर्थ्य
पस्य प्रवृत्तिः विस्पष्टपटुरित्यादावपि स्पष्टादीनि गुणवचनेष्विति गमकं बोध्यं तत्राहि विस्पष्टमित्यादि पटुत्वविशेषणमिति के
यकेस्यष्ठे इवेनेति हरीतकीं भक्षराजन्माते वहितावैरिणमित्यार्घसाध्वे वत्तिउ समानाधिकरणे प्रथमान्त्रमिहिते प्रथमेति वार्ति

पि२

तीसंबोध्यतावच्छेदकरूपेणसंबोध्यस्यसिद्धिंविनातत्त्वासंभवादनुवाद्यत्वं । विभक्तिः अनन्तरावविधेयभूतक्रियायामे
वेतद्दर्थान्वयउद्देश्यतया अतएवराजाभवपुध्यस्वराज्ञनपध्यस्वेत्यनयोर्यथैवन्वयेप्रयोगः रामपाहीत्यादौचाभि
मुखीभवद्रामाद्युद्देश्यकप्रवर्त्तनाविषयोरक्षणमितिबोधः ब्रजानिदेवदत्तेत्यादावपिजानीहीत्यादेः शेषोबोध्यस्तत्रब्र
जनस्यकर्मत्वाद्देवदत्तस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वमितिएकतिङ्वाक्यमित्यस्यचमुख्यमालेकतिङ्त्वर्थ
विधेय इतिनदोषः उद्देश्यभावोवाकार्यः आभिमुखीभवनानुकूलव्यापारश्चसंबोधनविभक्त्यंतशब्दप्रयोगाद्रूपः ब्रू
जानीतिप्राप्तकालेलोट् अतएवगच्छेत्याद्यध्याहारेविद्ध्युर्वेत्यादौप्रथमा अनध्याहारेतुद्वितीयैवेतिदिक्कृ
त्तिप्रथमाकारके कारकत्वंक्रियाजनकत्वंभाष्येकरोति क्रियांनिर्वर्त्तयतीतिव्युत्पत्तिप्रदर्शनात्ब्राह्मणस्यपुत्रंप
श्यानंपश्यतीत्यादौब्राह्मणस्यनकारकत्वंपुत्रेणतस्यासिध्यानत्वाभावात् अतएवषष्ठ्यांक्रियायामेवान्वयः क्रि
याजनकमितिज्ञातेकासाक्रियेत्याकांक्षोदयेनक्रियायाजनककाकांक्षायांचतत्रैवान्वयस्यौचित्यात् सर्वेषांचका
रकाणांस्वस्वावांतरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वंबोध्यं असंनिहितसंप्रदानस्यापिदातृबुद्धिस्थत्वा
वश्यकत्वेनस्वज्ञानपूर्वकालत्वेनैवजनकत्वं एवंस्तोकंपचतीत्यादौफलस्यापिघटंकरोतीतिस्मरतीत्यादौबो
द्धघटादेः पूर्वकालत्वेनस्मरत्यादिनिष्पादकत्वंबोध्यं कर्त्तुरीप्सि ऽप्सिततरादौत्रक्रियापरोनाभिप्रेतपरोरूढः स्वर्थं

यदि कार्यत्वादसिद्धौ कर्मीभूतस्याप्रमेयार्थकं परिमाणग्रहणमितिकेचित्तन्न युक्तमिति वाच्यं सिंहो माणवक इत्यस्यासिद्ध्या
पत्तेस्तद्वदस्यापि सिद्धेश्च नियमांशनिवेशमानाभावाच्च एकोद्वावित्यादिसिद्धये तद्वचनग्रहणं अन्यथैतत्सूत्रोपस्थिता
न भि हि तद्भूतस्यात्र फलाभावादेतदेकवाक्यतापन्नसंख्यावाक्यान्वयित्वेन तदप्राप्तेः रामावित्यादौ संख्याधिक्योप्रप्य
मानुयेककर्मपोरित्याधिकवाक्यन्न येतिवोध्यं मात्रग्रहणं तु यथा कर्मणि द्वितीयेति नियमेन कर्मत्वाज्ञानसमानका
लिकार्थौ तरस्यैव स्याद्वृत्तिर्नितु तज्ज्ञानसमानकालिकार्थान्तरस्यात एव गां दोग्धि पय इत्यादिवपादानादिबोधेपि त्वा
द्वितीया एवं च कर्मणि सत्येव द्वितीया न तु तदसत्वे इति नियमाकारस्तथा नेतापि प्रातिपदिकार्थसत्वे एव प्रथमा न
तु तदसत्वे इत्येव नियमः स्यात् एवं चानर्थकनिपातेभ्यः नैव स्यात् एवं च तत्समभिव्याहारे स पूर्वा याः प्रथमेत्यादि
शास्त्रप्रवृत्तिर्न स्यात् तत्सत्वे कर्मादियोग्यार्थप्रातिपदिकाद्येन तद्धि तस्यार्थ इत्यपि नदोषः इदमेव मात्रग्रह
णं कर्मणि द्वितीयेत्यादेर्मदुक्ताकारनियमत्वे मानं मात्रग्रहणाच्च सूत्रकारस्य प्रत्ययनियम एवाभिमतः
इति गम्यते तदकरणे लाघवेन तु कर्मणि द्वितीयैवेत्यर्थे नियम उक्तो भाष्यादौ स्पष्टं चेदं सर्वं भाष्ये इति भाष्यप्र
दीपोद्योते निरूपितमित्याहुः संबोधने च तत्र वर्तमानादि त्यर्थः संबोधनं ममिमुखीकरणं तन्न फलं प्रवृत्तिनिमि

युगपद्गुणैः असर्वलिंगां च बह्वर्थां तां जातिं कवयो विदुरिति लक्षणांतरं भाष्ये उक्तं सत्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां
या तो प्राप्नोति सा जातिलक्षणं यावद्द्रव्यभाविनीति तदर्थः अनेन गोत्वब्राह्मणत्वाद्योरुभयोरपि संग्रहः गुणैर्युगपत्
दुद्यमाणसह संबध्यते यथा निर्गुणस्य द्रव्यस्य नोपलंभस्तथा जातिरहितस्यापीत्यर्थः इति कैयटः इदं स्वरूपकथनमेवश्च
त्र लक्षणे सर्वलिंगानामित्यत्तन्मदुक्तार्थकमेव न तु लक्षणांतरमनयोर्योगात्त बह्वर्थी सर्वव्याक्ति व्यापिनीमित्यर्थः एतेन दे
कवाक्त तथा पूर्वलक्षणेपि मदुक्तमाख्येवोचिता अनतावकः पुनरेतयोर्जातिलक्षणयोर्विशेषः यथा पूर्वलक्षणं तथाकु
मारीभार्य इति भवितव्यं यथोत्तरं तथा कुमारभार्य इति लिंदे भाष्ये लक्षणमित्येकवचनमेवमप्युक्तं अत एवाकडारस
त्रशेषे आकृतिग्रहणा जातिरित्येवोक्तं भाष्ये इत्याहुः बलाकेति अयं च बिसकंठिकापदवाच्यजातिविशेषवाची स च
बकत्वव्याप्योऽन्योवेत्यन्यत् अस्त्री विषयादित्यस्य प्रवृत्तिनिमित्तैक्ये लिंगांतररहितभिन्नादित्यर्थः एतेन बलाकापती
ति यौगिकस्य सर्वलिंगत्वाद्बलाका बकपंक्तिः स्याद्बलाका बिसकंठिका बलाका कामुकी प्रोक्ता बलाकश्च बको मत इ
ति कोशात्पुंलिंगस्याप्यभिधानाच्च नेदं युक्तमित्यपास्तं अत एव पाककर्णीति सूत्रं चरितार्थं तद्धि स्त्रीविषयार्थमन्य
था तेषामपि यौगिकेष्वपि लिंगांतरसंभवेन पूर्वेणासिद्धेः तद्वैयर्थ्यं स्पष्टमेव पाककर्णे जातिवाचिनः किं बहुभष्या

शाखा स्त्रीविषयादपीति अजात्यर्थं तु न प्राक्पुष्पादिषु जातिवचनेषु नित्यस्त्रीलिंगेषु सदच्काण्डेत्यादिरिति बोधात् यो
पधादपीति पुनर्जातिग्रहणादिति भावः अस्त्रीविषयादिति तु पूर्वसूत्रेण विशिष्टं ते तिविरि स्त्रीपुंसयोरपत्यो तावद्भिः चतुः
ष्पदोरगाऽप्यमरादयं स्त्रियामपीति भावः इतः किं दरत्स्य जंमगधेभ्यएतेत स्त्रीत स्त्रीति लुक् च कुतः उकारो नोङ् धातो
रिति विशेषणार्थः अन्यथा यवाग्वास्यादावपि निषेधः स्यात् दीर्घोच्चारणं प्रश्लेषे लोकार इव विधान इराव ब्रह्मबंधु रि
त्यादि बहुव्रीहौ परकप् निवृत्त्यर्थं रूपाणां सवर्णदीर्घेण सिद्धेरिति भाष्ये स्य षेश्च श्वश्रूरिति श्वशुरः श्वश्रूरिति निर्देशात्सि
द्धं कुरूरिति एकादेशस्य पूर्वांतवत्त्वात् स्वादयः अध्वर्युरिति अध्वर्युः शाखाध्यायिनं शोऽध्वर्युःपत्नीः र ज्वा क्षितिउ नङ्इति
इतितु नेह संबध्यते अलाबूरिति भाष्ये दाहरणादिति भावः कृकवाकुरित्यत्र मनुष्य जातित्वाभावात् पूर्वेणापि न र
पंगोश्च पंगुशब्दो गुणवाचीति पूर्वेण प्राप्तिः श्वशुरस्येति श्वश्रूरिति निर्देशादस्याकारस्य लोपः तन्निर्देशात् सिद्धमेवे
त न भाष्ये त्विदं न दृश्यते आविति सूत्रस्य भाष्यस्वरसस्त्वयमन्यङ् नोभुत्पन्नं प्रातिपदिकमिति उरूत्तरपदा उपमीयं
ते ऽनयेत्युपमोपमानं तद्भाव औपम्यं उपमानत्वं एवं च तद्बोधको रुत्तरपदादिर्त्यर्थः उत्तरपदाद्वितीये पूर्वपदं
प्रत्यासत्त्योपमानतावच्छेदकं अतः करभोरूवामोरूरित्यत्र न तदा हो पमानवाचीति करभेति संज्ञा विंधादाकनिषेधः धारस्या

चेदंवारणार्थीनामीप्सितम्भाष्यकैयटयोः कर्तुरितिक्तस्यवर्त्तमानेइतिकर्त्तरिषष्ठी अप्राप्नोतिः सतंतान्मतिबुद्धीतिवर्त्तमानेकर्मणी
क्तः मतिरिष्टेतितत्राकरः एवंचकर्त्रीगन्तुमिष्यमाणंकर्मेत्यर्थः अप्राप्तिमात्रसंबंधः सचकर्तृपदार्थविशेषणीभूतव्यापा
रद्वारकएवानुपास्थितकल्पनेमानाभावात् एवंचकर्त्रीस्वनिष्ठव्यापारप्रयोज्यफलेनसंबंधमिष्यमाणमिष्यमाणमि
त्यर्थः यथातंडुलंपचतीत्यादौफलस्यापिव्यपदेशिवद्भावेनफलसंबंधित्वात्कर्मत्वं अतएवनतत्समानाधिकरणेस्तो
कंपचतीत्यादौकर्मत्वसिद्धिः क्तप्रत्ययोपात्तवर्त्तमानत्वंतुनविवक्षितंतेनकटंकृतवान् करिष्यतीत्यादिसिद्धिः कार
केकर्मसंज्ञंस्यादितिकारकेइतिप्रथमार्थेसोत्रीसप्तमीतेनकारकंसत्कर्मसंज्ञमित्यर्थः संज्ञिनः क्रियाजनकत्वेन
महासंज्ञयालब्धं यद्वासप्तमीयथाश्रुतैवकारकपदंचक्रियापरंकरोतिकर्तृकर्मादिव्यपदेशानितिव्युत्पत्तेः जनक
क्रियाध्याहारः विषयत्वंसप्तम्यर्थः कारकग्रहणेचस्वरितत्वप्रतिज्ञयेतदधिकारोक्तकर्त्रादिषट्कमेवतेननटस्य
वणमित्यादौनकृदुत्तरपदप्रकृतिस्वरः ग्रामेवासइत्यादौचतत्स्वरसिद्धिरित्यन्यत्रविस्तरः कर्तुः किमितितेदभावेपि
केनाप्युमित्याकांक्षायांकारकाधिकारात् व्यापारलाभइतिप्रश्नः माषेष्वितिमाषेषुप्रसक्तमश्वंमाषनाशो
माभूदितिअन्यत्रवध्नातीत्यर्थः नदोहकर्मणइतितमपग्रहणंकिमिति अवयवद्वारासमुदायस्यप्रश्नः कर्तुरु

द्वेष्यकर्मत्वेवास्त्वितिभावः पयसौदनमिति यदाकृतभोजनोऽपि पयोलोभेनौदनभोजनेप्रवर्तते तदेदमुदाहरणं क्रिया
यापय उद्देश्यकत्वात् ईप्सिततमशब्दस्य तु क्रियाशब्दत्वात्पयसस्तदाफलाश्रयत्वेनाविवक्षणान्नदोषइतिभावः
तमपः फलं त्वग्नेर्माणवकं वारयतीति तदभावे हि वारणार्थानामिति सूत्रेस्यापवादः स्यात् एवं च माणवकस्य
कर्मत्वं न स्यात् न चाग्नेस्तच्चरितार्थं तस्यापि तदुपस्थाप्यसंयोगरूपफलाश्रयत्वात् वारयतेस्त्वसंयोगाद्यनुकू
लव्यापाराभावानुकूलव्यापारोऽर्थः एवमेव प्रवृत्तिविघातः ईप्सितशब्द उभयत्रापि क्रियाशब्द एव न च संयोगो
न तत्कर्तृव्यापारजन्यः इति तत्र कर्मत्वाप्राप्तिरिति वाच्यं कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव
तेन लाभात् तमप्ग्रहणे त्वीप्सितमात्रे सावकाशस्य परत्वादीप्सिततमेनेन वाधः ईप्सिततमत्वं च प्रकृतधा
त्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं तच्च नास्त्यादौ फलव्यापारयोः प्रकृ
त्वं तधात्वर्थेऽनुप्रत्यासत्तिलभ्यं तेन यदा वत्सार्थं माषभक्षणाय माषक्षेत्रे एवास्त्वं धनं तदा माषेष्वश्वं वध्ना
ति इत्यादौ माषाणां न कर्मत्वं वंधनप्रयोज्यभक्षणफलाश्रयत्वेऽपि भक्षणस्य वध्नात्यर्थत्वाभावात् प्रयोज्यत्वति
वेशाद्गां दोग्धीत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्पष्टं भाष्ये